પાનો ૯૦

પો० नं० १२०५
પુ० न० २२६२

अर्हम्।

श्री सत्यविजयग्रन्थमाला नं ५

पंन्यासजी महाराज
कनक मुनि जी ग...

आचार्यश्रीविजयनीतिसूरीश्वरपादपद्मेभ्यो नमः

पण्डितश्रीशुभवर्धनगणिविरचितम्

# ॥ श्रीपांडवचरित्रं महाकाव्यम् ॥

प्रकाशकः—

सत्यविजयग्रन्थमालाना कार्यवाहक श्रेष्ठिवर्य बालाभाइ मूलचन्द—अमदावाद.

वीर संवत् २४४९ प्रथमावृत्तिः प्रत ५०० सने १९२२

श्री जैनएडवोकेट प्रि. प्रेसमां शा चिमनलाल गोकळदासे छाप्युं, घीकांटावाडी—अमदावाद.

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

( आचार्यश्रीविजयनीतिसूरीश्वराणां स्तुत्यष्टकम् )

बाल्याच्छ्रीब्रह्मचारीसकलजनहितानन्दकःसत्यवादी
श्रीमच्छ्रीनीतिचारी गुणिजनसकलान् बोधयन् राजते वै ।
नीत्याद्यः सूरिराजश्च विजयचरमः शान्तमूर्तिर्दयालु-
राकापूर्णेन्दुवक्त्रस्त्रिदिवपतिगुरुः सर्वदेवेशमान्यः ॥ १ ॥
विद्याविचक्षणजनैः कृतकीर्तिगानं पञ्चव्रतादिपरिपालकमासवर्यम् ।
श्रीजैनसूरिमनिशं नमतु प्रकृष्टं भूमौ सुनीतिविजयं जनताघनाशम् ॥ २ ॥
शिष्यप्रशिष्यसद्वृन्दै-र्वन्दितस्तदनुज्ञया । प्रवर्त्तमानसच्छास्त्रै-र्युक्तैर्विजयतेतराम् ॥ ३ ॥
वर्चसा ब्रह्मचर्यस्य दीपयन्तं दिशो दश । श्रीनीतिविजयाचार्यं वन्दध्व सकला जनाः॥ ४ ॥
निर्मत्सरं मनः कृत्वा मान्यो गुणिजनैः स च । निर्मत्सरो हि साधूना-मात्मतत्त्वविचिन्तकः ॥५॥
पन्न्यासपदवांश्चैव तथा गणिपदं दधत् । श्रीहर्षविजयो नित्यं सुशास्त्रार्थविबोधकृत् ॥ ६ ॥
श्री मानविजयः प्राज्ञः कल्याणमंगलाभिधौ । सुमतिविजयश्चैव चत्वारः साधवः खलु ॥ ७ ॥
विक्रमार्कनृपस्याब्दे नन्दर्षिनन्दभूमिते । मार्गे सिते हि शुक्लास्ये सतेने रविणा कृताः ॥ ८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्री० १२०५
पु० २२९२

पंन्यासजी महाराजश्री
कनक मुनीजी गणी.

अर्हम्।

श्रीसत्यविजयग्रन्थमाला नं ५

क्रियोद्धारकअनुयोगाचार्यपंन्यास श्रीसत्यविजयगणिपादपद्मेभ्यो नमः

पण्डितश्रीशुभवर्धनगणिविरचितम्

# ॥ श्रीपाडवचरितं महाकाव्यम् ॥

जगत्त्रयीपूजितपादपद्मः । श्रीनेमिनाथस्तनुतां शिवानि ॥
यो यौवनस्थोऽपि जगत्त्रयैक--मल्लं कलाकेलिभटं विजिग्ये ॥ १ ॥
जगत्त्रयख्यातयशोभराणां । भवेऽत्र दीक्षासमहोदयानां ॥
श्रीपांडवानां चरितं पवित्रं । विधीयते स्वप्रतिबोधहेतोः ॥ २ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रीहस्तिनापुरमिहास्ति समस्तवस्तु-विस्तारधामकुरुदेशललामतुल्यं ॥
श्रीशांतिकुंथ्वरजिनत्रितयस्य चारु-चैत्यानि यत्र च महांति विभांति नित्यं ॥ ३ ॥
श्रीमारुदेवतनुजस्य कुरोर्नृपस्य । नाम्नान्वये त्वमितपूर्वनृराजितेऽत्र ॥
श्रीशांतनुर्नृपवरोऽजनि दर्पतुल्याकारः सुधाकरसमानयशःसमूहः ॥ ४ ॥
संपूर्णमंडलकलाधरवत्कलाभिः । पूर्णस्य तस्य जगतीपतिरम्यकस्य ॥
दोषो महान् खलु कलंक इवैक एव । मन्ये बभूव मृगयाव्यसनैकरूपः ॥ ५ ॥
आरुह्य वाजिनमथोमृगयेच्छयागात् । सिंहादिजीवकुलसंकुलकाननं सः ॥
संत्रासयंश्चपलतुंगतुरंगमस्थो । जीवान् शरासनशरोद्धतपाणिपद्मः ॥ ६ ॥
यूथानि नेशुर्मृगपुंगवानां । त्रेसुः शशा भूरिभयाः समंतात् ॥
कुर्वंति कोलाः किल घुर्घुरेति-शब्दान् प्रणेशुः खलु शांवराश्च ॥ ७ ॥
निकुंजमध्ये विविशुर्गजानां । कुलानि भीतानि च चित्रकाणां ॥
तस्मिन् शरान्मुंचति सर्वतश्च । हाहा ! ऽधमानां मृगयाविनोदः ॥ ८ ॥



P.P. Ac. Gunratnasuri M.S.
Jin Gun Aaradhak Trust

दूराद्‌थैको हरिणो नरेन्द्रं । दृष्ट्वा कुरंगीं पुरतो विधाय ॥
विवेश कुंजांतरनुप्रपश्यन् । क्षणान्नरेन्द्रोऽनुपदं ततश्च ॥ ९ ॥
तुरंगगः सोऽपि निकुंजमध्ये । गच्छन् जवेन द्रुतमेक एव ॥
स्वधीमशोभाहरणप्रवीणं । प्रासादमेकं पुरतो ददर्श ॥ १० ॥
उत्तीर्य वर्यतुरगाद्वसुधाधवोऽयं । तत्सप्तभूमिकगृहं कुतुकावलोकी ॥
अध्यारुरोह कुतुकानि पदे पदे चा-पश्यत् प्रसारितदृशा विविधस्थितीनि ॥ ११ ॥
आरूढमात्रः किल सप्तमीं भुवं । स भूमिपालः कमलानिकेतनम् ॥
एकामपश्यद्वररूपशालिनीं । स्मेराननां तत्र कनीं खनीं श्रियः ॥ १२ ॥
नृपालमालोक्य ततः कनी सा । समर्पयामास निजासनं तम् ॥
न्यवीविशद्विस्मितचित्तवृत्तिः । पप्रच्छ भूपस्तदनु प्रसन्नः ॥ १३ ॥
कल्याणि कासि भवती निलयेऽत्र चित्र-सौख्यप्रदे गुरुवने किमु तिष्ठसीह ॥
प्राणोदयन्निजसखीं वितरीतुमेषा । कन्योत्तरं प्रमदकंचुकितांगभागा ॥ १४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सख्याह राजन्नवधारय त्वं । वैताढ्यशैले किल जह्नुनामा ॥
समग्रविद्याधरमौलिरत्नं । नृपोऽस्ति सद्रत्नपुरेश्वरश्च ॥ १५ ॥
गंगाभिधाना तनयास्य चंगा । गुणैरियं सर्वकला प्रवीणा ॥
क्रमेण सद्यौवनमाप यूनां । मनोहरं तप्तसुवर्णदेहा ॥ १६ ॥
अन्येद्युरेषाथ सभागपित्रा । क्रोडस्थिता प्रेमभरेण पृष्टा ॥
स्वच्छाशये पुत्रि वदाधुना त्वं । कस्ते वरेन्द्रः खलु रोचतेऽत्र ॥ १७ ॥
प्रोवाच कन्या वचनं मदीयं । यस्तात नातिक्रमतीह किंचित् ॥
योग्यो वरोऽसौ वरणीय एव । मया न चान्यो गुणवानपीह ॥ १८ ॥
श्रीजह्नुभूपेन ततो मुदालं । भूपालपुत्राः स्वकनीं वरीतुं ॥
प्रार्थ्यंत संधाकथनप्रपूर्वं । सर्वंभराप्राप्तयशोविलासाः ॥ १९ ॥
ते नाद्रियन्तेस्म परं गुणौघ—ख्यातामिमां स्त्रीपरतन्त्रतायाः ॥
भीतास्ततः खेदमियं प्रपन्ना । जिनेन्द्रधर्मं श्रयतिस्म साधोः ॥ २० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः प्रभृत्यत्र गृहे स्वविद्या—सिद्धैः सदा तिष्ठति नष्टभीतिः ॥
नमस्कृतिध्यानपरा त्रिसंध्यं । जिनेन्द्रपूजागुरुभक्तियुक्ता ॥ २१ ॥
तदद्य पुण्यैः फलितं किलास्या । यज्जह्नुरागान्नृपतिर्मुदात्र ॥
केनापि नैमित्तिकपुंगवेन । युक्तः प्रमोदादिति वाक्यमाख्यत् ॥ २२ ॥
वत्सेऽद्य नूनं मृगयातिसक्तः । श्रीशातनुर्भूमीपतिर्महौजाः ॥
आयास्यति प्राक् तव पुण्ययोगा—द्योग्यो वरस्ते भविता स एव ॥ २३ ॥
उक्त्वेष्टमेतद्वचनं स्वताते । जह्नौ गते भूमिपते विशेषात् ॥
चक्रे ऽद्य सद्यो जिनराजपूजां । विवेकिनीयं विविधोपचारैः ॥ २४ ॥
संप्रेरितः पुण्यभरादमुष्याः । प्राप्तोऽसि सौभाग्यगुणांबुराशे ॥
श्रीशांतनुक्ष्मापतिराह हृष्ट—स्ततो ममेष्टा प्रतिपत्तिरस्याः ॥ २५ ॥
नोल्लंघनीयं वचनं मयास्याः । कदाचिदप्यद्भुतरूपवत्याः ॥
समागतायाः स्वगृहे रमाया । अनादरं को हि बुधः करोति ॥ २६ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यद्यहमस्या वचनव्यतिक्रमं । करोमि जात्वज्ञतया शुभाशया ॥
त्याज्योऽनयाहं खलु सर्वथा ध्रुवं—इंडो ममार्य भवतान्महान् यतः ॥ २७ ॥
अन्योन्यमेषामिति जायमाने । संजल्पने प्रेमभरेण तत्र ॥
भूमीपतेस्तस्य तदैव पश्चा-ल्लग्नं समागात्कटकं समग्रं ॥ २८ ॥
तत्रागतो जह्नुरपि स्वकन्या—संख्या च विज्ञापितमात्र एव ॥
हर्षप्रकर्षेण समालिलिङ्ग । श्रीशांतनुक्ष्मापतिमादरेण ॥ २९ ॥
गंगामनंगाधिपवासमन्दिरं । शृंगारसारां घनपुण्यदेहभां ॥
तदैत जह्नुः किल पर्यणाययद्—भूमीपतिं शांतनुमुत्सवेन ॥ ३० ॥
वैताढ्यलक्ष्मीं श्वशुरादवाप्य । स्वगौरवं शांतनुभूमिपालः ॥
गंगां गृहीत्वा सह सेनया स्वं । महोत्सवैः प्राप पुरं श्रिया वरम् ॥ ३१ ॥
सद्भोगभंगीं सह गंगयाति—प्रेम्णा सदा भुक्तवतः प्रकामम् ॥
कालः कियान् सौख्यमयो जगाम । महेश्वरस्येव नृपस्य तस्य ॥ ३२ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

काले दधौ प्राग्भवपुण्यपुण्यं । गंगा सुगर्भं वरशुक्तिकेव ॥
प्रासूत राज्ञी समये सुतं तत् । सल्लक्षणैर्लक्षितमुत्तमेऽह्नि ॥ ३३ ॥
ततः क्षमाभृद्विविधान् महोत्सवान् । विधाय संतोषितसर्वपूर्जनः ॥
गांगेयनाम्ना नृपतिः स्वनन्दनं । तत्कालमालापयदेष हर्षतः ॥ ३४ ॥
अलालयन् पंच विचक्षणास्तं । धात्र्योऽर्भकं भाग्यकलारसालम् ॥
यथात्मनोऽनेकवरेण्यभावै—र्मनः समग्रेन्द्रियबुद्धयश्च ॥ ३५ ॥
पापर्धिमन्येद्युरथो विधातुं । समुद्यतं शांतनुभूमिपालम् ॥
निरीक्ष्य गंगादयिता दयालु—चित्ता बभाषे मृदुभाषयेति ॥ ३६ ॥
सुनीतिभाजामथ शौर्यशालिना—मग्रेसरस्त्वं खलु वर्तसे विभो ॥
निघ्नान् मृगादीन् मृगयाविनोदकृत् । सुनिर्मलं कं लभसे गुणं सताम् ॥ ३७ ॥
क्रीडार्थ जीवांतकरी नराणां । भवांतरे स्यान्नरकाय नूनम् ॥
एवं विचार्य स्वहृदि त्वयात्र । कदापि कार्या मृगया न राजन् ॥ ३८ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

श्रुत्वेति राज्ञ्या गदितं वचोऽलं । जगाद भूपः शृणु सौख्यखाने ॥
तथ्यं च पथ्यं च वचस्त्वदीयं । सुनीतिमार्गं स्फुटमश्नुति द्राग् ॥ ३९ ॥
जानामि धर्मं करुणैकमूलम् । त्यक्तुं क्षमो न मृगयाभिलाषम् ॥
त्यक्षामि यावन्मृगयां हृदेति—ध्यायन्तमस्यां प्रणुदेऽनुमीम् ॥ ४० ॥
दुःखाय नूनं व्यसनान्यमूनि । विज्ञायमानोऽत्र भवे परत्र ॥
त्यक्तुं न शक्यानि मया मृगाक्षि । प्रकामकण्डूवदमन्ददोषात् ॥ ४१ ॥
हिंसामधर्मं सुविदन्नथाश्रवं । तमस्मरन्नप्यहमन्वयं खलु ॥
व्रजामि भद्रे मृगयाकृते यतः । स्थातुं न शक्नोमि करोमि किं हहा ॥ ४२ ॥
आखेटकाय प्रगतो नरेन्द्रः । प्रोच्येति सद्यः सुभटौघयुक्तः ॥
दूनाथ राज्ञी स्ववचोऽपमाना—द्वैताढ्यशैले हि गता सपुत्रा ॥ ४३ ॥
पापर्द्धिमाधाय चिरं नरेन्द्रः । प्राप्तः स्वगेहं किल सांगजायाः ॥
निशम्य राज्ञ्या गमनं स्वतात—गेहेऽपमानादतिदुःखमाप ॥ ४४ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जायासुतात्यन्तवियोगदुखा—त्तनश्चतुर्विंशतिवत्सराणि ॥
आखेटकस्य व्यसनं विमुच्य । तस्थौ नराधीश्वरशान्तनुस्तु ॥ ४५ ॥
ततः प्रकृत्या समुदीरितोऽथा—वधूय भार्यासुतयोर्वियोगम् ॥
पुरातनं तं मृगयाविनोदं । कर्तुं रसादारभतेस्म सद्यः ॥ ४६ ॥
अत्रान्तरे कोऽपि युवा कुमारः । करस्थकोदण्डशरःशरण्यः ॥
विभूषिताङ्गः सुभगाकृतिस्तं । सकोप एवं वदतिस्म भूपम् ॥ ४७ ॥
किमत्र भो भो मृगया मृगादि—संहारिणा निर्दयमानसेन ॥
विधीयते धीवरवद्वनस्थे । मयि त्वया रक्षति सर्वजन्तून् ॥ ४८ ॥
ततो निवर्त्तस्व भवद्रुमूला—दाखेटकादत्र पवित्रसत्रे ॥
नो चेत्कथाशेषमहं भवन्तं । द्रुतं करिष्ये ह्यमुना शरेण ॥ ४९ ॥
स्मित्वा ततः शांतनुराह भूप—स्त्वद्वाक्यतोऽस्मान्न बिभेमि बाल ॥
मृगार्भकस्याशु रवं निशम्य । नश्यत्यहो किं हरिणाधिनाथः ॥ ५० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततस्तयोरत्र शराशरिश्रा—गलीलगद्घोरतरं रणं च ॥
छिनत्ति कारुण्यतःकुमारः । शरैः शरांस्तस्य स नैव भूपम् ॥ ५१ ॥
भूपस्तु कोपेन मुमोच बाणां—स्तं प्रत्यसंख्यान् खलु तद्वधाय ॥
विद्याबलात्ते विफलीबभूवु—स्तस्मिन् यथाब्दा मरुतः पुरस्तात् ॥ ५२ ॥
नृपस्ततः सर्वबलेन युद्धं । कुर्वन् कुमारेण समं विषण्णः ॥
विचिन्तयत्येवमसौ परीक्षां करोति मे किं त्रिदशो हि कोऽपि ॥ ५३ ॥
तस्मिन्नरण्येऽथ समागता द्राग् । गङ्गा तयोराहवरौद्रशब्दान् ॥
श्रुत्वा स्वपुत्रं स्वपतिं च दृष्ट्वा । हृष्टा सती क्षिप्रमिदं जगाद ॥ ५४ ॥
स्ववंशमुक्ताफलवत्सुवत्स । गांगेय सद्गेयगुणाभिराम ॥
साकं स्वपित्रा समरं विधातुं । न युज्यते जातु भवादृशानां ॥ ५५ ॥
ततो विमुच्याशु रणं त्वमात्म–पितुः पदाब्जं प्रणमस्व भक्त्या ॥
यतः कुलीना मनसाप्यभक्ति । कुर्वन्ति पित्रोस्तनया न पुण्यात् ॥ ५६ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निशम्य गांगेयकुमारकोऽपि । स्वमातुरेवं वचनं विबुद्धः ॥
विमुच्य युद्धं नमतिस्म तात—श्रीशांतनोर्भक्तिभरात्पदाब्जे ॥ ५७ ॥
श्रीशांतनुस्तं स्वसुतं विदित्वा । प्राणप्रियां तामवलोक्य गङ्गाम् ॥
दधौ तमानन्दममन्दमात्म—चित्ते विदित्वाखिलविघ्नमेव ॥ ५८ ॥
ततः समालिङ्गति गाढमात्म—तनूरुहं तं स च भूमिभर्ता ॥
भार्यां निजां प्रेमभरेण तां च । प्रीणाति सारैर्वचनामृतैर्द्राग् ॥ ५९ ॥
स्वतातगेहं गतया त्वया रया—द्विमुक्तमेतत्सकलं गृहं मम ॥
बभूव निःश्रीकमलं यथाब्जिनी—मुक्तं प्रिये प्रौढतरं सरोवरम् ॥ ६० ॥
प्रद्युम्नयुक्तां कमलां विना हरि—र्यथा रतिं नो लभते कदाचन ॥
तथा प्रिये त्वां ससुतां विना मनाग् । कदाप्यहं नैव लभे मनोधृतिम् ॥ ६१ ॥
कुलावतंसेन सुतेन साकं । ततः प्रियेऽलङ्कुरु मन्दिरं स्वम् ॥
यतः स्वकीये गृह एव शोभां । लभेत नूनं कुलजा मृगाक्षी ॥ ६२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वभर्तुराकर्ण्य वचस्तदेव--मुवाच गंगा सुभगानना तम् ॥
संसारकासारघनाघनाभा । भोगाश्च चित्तेऽथ धृतिं न कुर्युः ॥ ६३ ॥
ततः प्रियाहं विधिना जिनोक्त-मिहैव धर्मं विमलं करिष्ये ॥
स्वस्त्यस्तु ते भूप सुतेन साकं । कुरुष्व राज्यं चिरमात्मपुर्याम् ॥ ६४ ॥
कदाग्रहं घोरतरं प्रियाया--स्तस्या हि मत्वा नृपतिर्विखिन्नः ॥
गांगेयपुत्रेण समं ततश्च । जगाम पुर्यां विरहातुरश्च ॥ ६५ ॥
अथान्यदा शांतनुभूमिनेता । क्रीडां विधातुं विपिने प्रवृत्तः ॥
क्वचित्प्रदेशे तटिनीतटस्थां । कांचित्कनीं रूपवतीं ददर्श ॥ ६६ ॥
कस्यात्मजा का त्वमिह स्थिता किं । पृष्टेति भूपेन जगाद कन्या ॥
नृरत्न ! नौवाहकपुत्रिकाहं । नौवाहनायात्र तटे स्थितास्मि ॥ ६७ ॥
ख्याता जने सत्यवतीति नाम्ना—स्म्यहं निशम्येति स भूमिपालः ॥
तद्रूपसंजातदृढानुराग—भरेण तत्तातमुपाजगाम ॥ ६८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जगौ च भो नाविक रूपपात्रं । पुत्रीं निजां मे नृपतेः प्रदाय ॥
लब्धा मितर्द्धिः स्वजनेन साकं । सौख्यान्यसंख्यानि चिराय भुंक्ष्व ॥ ६९ ॥
स नाविकस्तद्वचनेन हृष्ट—स्त्विदं जगौ भूमिपते न तेऽहम् ॥
दास्ये स्वकीयां तनयां यतस्ते । गांगेयनामा प्रबलः सुतोऽस्ति ॥ ७० ॥
तस्मिन् सुते राज्यधरे प्रवर्त—माने कुतो मे तनयासुताय ॥
राज्यं ततोऽहं भवते न दास्ये । प्रशस्यरूपां तनयां मदीयाम् ॥ ७१ ॥
नृपस्ततोऽतीव विखिन्नचित्तः । स्वावासमागादसमाप्तवांछः ॥
तां किंवदंतीमवगत्य गाङ्गि—र्दध्यौ स्वकीये मनसीति दूनः ॥ ७२ ॥
धिगस्तु तेषां हि नराधमानां । जनुश्च दोर्वीर्यमथो वृथैव ॥
सुपूज्ययोर्दैवतवत्सुपित्रो—र्न पूर्यते यैरखिला किलाशा ॥ ७३ ॥
साधोरसाध्यैर्विविधैरुपायै—रतः कनीं तां यदि दापयामि ॥
पित्रे पवित्राय तदाखिलेषु । सदा नरेषूत्तमतां लभेऽहम् ॥ ७४ ॥

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

एवं विमृश्यासजनैः परीत—स्तूर्णं कुमारः स तु नाविकस्य ॥
समीपमागत्य सुधासुधाकृ—द्गिरा गरिष्ठः स्वगुणैरुवाच ॥ ७५ ॥
श्रीशान्तनुक्ष्मापतयेऽनुरक्त—चित्ताय योग्याय कनीं निजां त्वम् ॥
दत्से न नौवाहक कारणेन । येनाशु तन्मे पुरतो वदाभीः ॥ ७६ ॥
ततोऽवदन्नाविकराड् कुमारः । कथं प्रयच्छामि कनीमहं त्वाम् ॥
ताताय ते येन सुतोऽसि राज्य—भृत्त्वं ततो मे तनयात्मजैः किम् ॥ ७७ ॥
गङ्गात्मजः प्राह भवेऽत्र राज्यो—पवेशने हि नियमो ममास्तु ॥
याचे कनीं द्राग् मम देहि पित्रे । हेतौ हते कः कुरुते विलम्बम् ॥ ७८ ॥
स्मित्वाह किञ्चिज्जलयानवाही । त्वया निषेधो विहितो हि राज्ये ॥
परं सुतास्ते सदृशास्तवैव । नो भाविनस्तत्स्वकनीं न दास्ये ॥ ७९ ॥
ततः कुमारः पितृभक्तिरक्त—चित्तोऽवदन्नाविकमेनमेवम् ॥
यदेति चेच्चेतसि तन्ममास्तु । ब्रह्मव्रतं घोरतरं भवेऽस्मिन् ॥ ८० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रुत्वेति वाचं कुमरस्य हृष्टः । स नाविकः प्राह कुमारमेनम् ॥
त्वं वै समादाय कनीमिमां मे । स्वकीयपित्रे परिणाययाशु ॥ ८१ ॥
स्वकार्यसिद्धेरतिहृष्टचेता । गङ्गातनूजः परिगृह्य कन्याम् ॥
तां पूरयामास मनोरथं स्व—पितुर्द्रुतं शांतनुभूमीशितुः ॥ ८२ ॥
लोकोत्तरस्फारगुणे प्रकामं । भक्तेऽथ गङ्गातनुजे तनूजे ॥
विन्यस्य सर्वां निजराज्यचिन्तां । भुङ्क्ते सुभोगान्नृपतिस्तया सः ॥ ८३ ॥
क्रमेण राज्ञा सह भुक्तवत्या । भोगान् यथेच्छं किल सत्यवत्याः ॥
सुतावभूतामथ चित्रवीर्य—विचित्रवीर्यौ भुजवीर्यवर्यौ ॥ ८४ ॥
काले कियत्यपि गते किल कालधर्मं । श्रीशान्तनुक्षितिपतावथ चित्रवीर्यम् ॥
गङ्गात्मजः क्षितिपतिं द्रुतमात्मराज्ये । चक्रे युवक्षितिपतिं च विचित्रवीर्यम् ॥ ८५ ॥
गङ्गाभवे क्वापि महाहवे गते । श्रीचित्रवीर्यो रिपुणा विनाशितः ॥
मत्वा चराद्भ्रातृवधमृत्युमाशु । जघान गङ्गातनुजोऽपि तं रिपुम् ॥ ८६ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः प्रमोदेन विचित्रवीर्यं। संस्थाप्य राज्येऽद्भुतरूपभाजाम् ॥
भीष्मः कनीनां कृतवान् किलांबा—वाडांबिकानां च पतिं क्षणेन ॥ ८७ ॥
कामं तदासक्तिवशेन जात—राजयक्ष्मनामामयतो विपन्नः ॥
विचित्रवीर्यः सहसाथ तासां। क्रमेण जातास्तनया इमे च ॥ ८८ ॥
आद्यः सुतः श्रीधृतराष्ट्रनामा । पांडुर्द्वितीयो विदुरस्तृतीयः ॥
बभूव रूपद्गुणशालिनोऽमी । मन्ये नरार्थी इव सज्जनानाम् ॥ ८९ ॥
अष्टौ सुकन्याः सुभगाश्च गांधा—र्यीद्या नृपाणां धृतराष्ट्रसूनुः ॥
महैर्महर्घ्यां परिणायितः श्री—गङ्गात्मजेनात्मदृढव्रतेन ॥ ९० ॥
दुर्योधनाद्यास्तनया नयज्ञाः। क्रमेण तासां शतकौरवाश्च ॥
बभूव दुर्योधनजन्ममासै—स्त्रिशद्भिरत्रैव च दिव्यवाणी ॥ ९१ ॥
एष दुर्योधनो राजा । मधुपिङ्गललोचनः ॥
न केवलं कुलस्यान्तं क्षत्रस्यांतं करिष्यति ॥ ९२ ॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

सूरीपुरेशांधकवृष्णिराजः । कुन्तीसुतायां किल रूपलक्ष्म्याम् ॥
केनापि पुंसा बहुवर्णितायां । पांडोरभूद्भूरितरानुरागः ॥ ९३ ॥
सदःस्थितस्यान्धकवृष्णिराज्ञः । कौन्त्या कुमार्यांकनिषण्णयाथ ॥
केनापि पुंसा बहु वर्ण्यमानाः । पांडोः कुमारस्य गुणाः श्रुताश्च ॥ ९४ ॥
ततोऽनुरागं सुतरां दधाना । तस्मिन् प्रतिज्ञामकरोदिमां सा ॥
भवेऽत्र भर्ता मम पांडुरेष । भूयान्न चेत्संयमयोग एव ॥ ९५ ॥
ततः परं केलिवनात्मसख्या-लापादिकौतूहलमंडलेभ्यः ॥
मनः स्वकीयं विनिवृत्य कौन्त्या-स्थाप्यत्र पांडौ मुनिनात्मनीव ॥ ९६ ॥
शुभाशुभः पूर्वभवे बभूव । मेलापको यस्य हि येन साकम् ॥
तस्य श्रुतेर्दर्शनतोऽथवात्र । भवे भवेत्प्रीतिरमुत्र जन्तोः ॥ ९७ ॥
तस्या वियोगेन रतिं स्वगेहे--ऽप्यनाप्नुवन् पांडुकुमार एषः ॥
चरन् वनेऽपश्यदयःशरैः कं-चित्कीलितं मूर्छितमेव मर्त्यम् ॥ ९८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व्यलोकयत्तत्पुरतश्च खड्गं । ततो भृशं मुक्तवियोगदुःखः ॥
तद्दर्शनात्कोयमिति स्वचित्ते । व्यचिंतयत्सोऽलिदयार्द्रचेताः ॥ ९९ ॥
तस्मिन् कृपाणे पुनरौषधी युगं । दृष्ट्वा च मत्वा महिमानमस्य ॥
नरं विशल्यं स तमेकयाऽकरोद्गूढव्रणं जातकृपोऽन्यया च ॥ १०० ॥
कस्त्वं ह्यवस्था कथमीदृशी ते । प्रोक्ते जगावेष च पांडुनेति ॥
विद्याधरेन्द्रोऽनिलगत्यभिख्यः । प्रौढर्द्धिरस्मि प्रबलप्रतापः ॥ १०१ ॥
विद्याभृताऽशनिवता मदनातुरेण । प्राणप्रिया मम बलेन हृता समीपात् ॥
पृष्टानुगः प्रचुरकोपभरादवस्थां । संप्राप्तोऽस्मि सहसा सुभगेदृशीं च ॥ १०२ ॥
निष्कारणोपकृतिमान्मम भाग्ययोगा-न्नुन्नः समागमदिहात्रभवान् भवांस्तु ॥
कष्टादतो तरणदुःखकराद् दयार्द्र—सन्मानसः सुभग मां यदमोचयच्च ॥ १०३ ॥
प्राणप्रदस्येति करोम्यहं कं । वातस्तव प्रत्युपकारमाशु ॥
महौषधीयुग्ममिदं गृहाण । मुद्रामिमां त्वं च तथापि राजन् ॥ १०४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वचिंतितस्थानगमादि मुद्रा—योगाद्भविष्यत्यचिरेण बन्धो ॥
पुनः स्मृतोऽहं भवते प्रदास्ये। साहाय्यकं संशयहीनमाशु ॥ १०५ ॥
उक्त्वेति विद्याभृदसौ पदं स्वं। ययौ सदा तद्गुणहृष्टचित्तः ॥
ध्यायन् स्वचित्ते किल पांडुराजा। तं तां च सद्यः स्वपुरं जगाम ॥ १०६ ॥
अस्मिन् क्षणे पांडुवियोगदुःखा—कुलाथ कौन्ती किल तस्य योगम् ॥
मत्वा सुदुःप्रापमतीव खिन्ना। क्रीडावनं प्राप मृतीच्छयाशु ॥ १०७ ॥
अभ्यर्थयेऽहं कुलदेवतेऽदः। कृतांजलिर्दुर्लभभर्तृकाद्य ॥
प्रियेऽधुना निःशरणेतिवाद—मुक्त्वा गले पाशमबन्धयच्च ॥ १०८ ॥
यावद्भ्रमार्त्ता भ्रमति स्वचित्ते। कौन्ती स्मरन्ती खलु पांडुमेव ॥
मुद्राप्रभावेण तदेह तावत्। पांडुः समागादिति भाषमाणः ॥ ९ ॥
मृतिं प्रिये मा कुरु मा कुरु त्वं। त्वत्पुण्यतः पांडुरिहागतोऽस्मि ॥
प्रोच्येति चिच्छेद तदीयकण्ठा—त्पाशं कराभ्यां सहसाथ राजा ॥ ११० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्ववल्लभं पांडुमिहागतं सा । विज्ञाय हर्षं सुतरां जगाम ॥
प्रस्वेदरोमांचकमुख्यमात्म—देहे स्वभावं खलु वर्धयन्ती ॥ १११ ॥
कुन्ता सतीत्वं हि समीहमाना । तदैव गान्धर्वविवाहयोगात् ॥
सख्योपनीतोचितसर्वभावा । तं पर्यणैषीत् किल हृष्टचित्ता ॥ ११२ ॥
सम्भोगतस्तत्र तदैव दैव—योगादृतुस्नाततयाथ कुन्ती ॥
गर्भं दधौ पांडुनृपाय दक्षा—वतंसिका चाकथयद् द्रुतं च ॥ ११३ ॥
स्वसिद्धकार्योऽथ नृपोऽपि मुद्रा—योगान्निजद्रंगमसौ जगाम ॥
गर्भं दधाना सुतरां जुगोप । स्वं कुन्त्यपि स्वीयजनव्रजेभ्यः ॥ ११३ ॥
संगोप्यमाना सततं स्वधात्री—सखीभिरेषा किल कुन्त्यसूत ॥
काले सुतं रोहणशैलधात्री । यथा सुगुप्तं रजसेव रत्नम् ॥ ११४ ॥
ह्रिया सती सा वरकांस्यपेटा—क्षिप्तं शिशुं तं मनसा विनैव ॥
प्रवाहयामास तदैव गङ्गा—महाप्रवाहे स्वसखीजनेन ॥ ११५ ॥



P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

पेटा प्रवाहेण च नीयमाना । श्रीहस्तिनाद्रङ्गमथागता सा ॥
सूताभिधानेन गतेन तत्र । प्रातस्ततः सारथिना गृहीता ॥ ११६ ॥
अब्दैर्विमुक्तं रविमंडलं यथा । कोकः समालोक्य किलातिमाद्यति ॥
हृष्टस्तथास्यां स विलोक्य बालकं । राधाप्रियायै सुतवत्समार्पयत् ॥ ११७ ॥
आलाप्यमानः स च कर्ण इत्या—ख्ययाथ ताभ्यां खलु वृद्धिमाप ॥
पदं गुणानामयमेव नून—मिति क्षितींद्रस्य स वल्लभोऽभूत् ॥ ११८ ॥
इतश्च कुन्त्याः किल चित्तभावं । धात्र्यावगम्यांधकवृष्णिभूपः ॥
तां पांडुना सार्धमथेन्दुना च । निशामिवोच्चैरुदवाहयच्च ॥ ११९ ॥
श्रीमद्रकस्याथ नरेश्वरस्य । पुत्री पवित्रा खलु मद्रिकेति ॥
स्वयंवराप्ता गुणरंजितैव । पांडोर्द्वितीया दयिता बभूव ॥ १२० ॥
ताभ्यां प्रियाभ्यां सह पांडुराजा । भुनक्ति भोगान् प्रसरत्प्रतापः ॥
कामं रतिप्रीतियुगेन साकं । यथा कलाकेलिरमेयशक्तिः ॥ १२१ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वप्नेऽथ कुन्ती महिषी सुराद्रिं । क्षीराम्बुधिं भास्करमिन्दुबिम्बम् ॥
श्रियं च कस्मिन्नपि वासरे द्राग् । ददर्श रात्रौ बहुभागधेया ॥ १२२ ॥
तस्य प्रभावाद्दधतिस्म गर्भं । सा रत्नगर्भेव दिने दिनेऽपि ॥
निरन्तरं बन्धुरधर्मकर्म—मनोरथश्रेणिमचिन्तयच्च ॥ १२३ ॥
लग्ने शुभे शोभनवासरे च । पञ्चग्रहैरुच्चतराश्रयस्थैः ॥
असूत कुन्ता तनयं च याव—द्दिवः पपातौकसि पुष्पवृष्टिः ॥ १२४ ॥
लसद्दयादानदमादिसर्व—गुणान्वितोऽयं किल धर्मपुत्रः ॥
इत्युच्चरन्तस्त्रिदशास्तदा त—द्गेहे समाजग्मुरमन्दमोदात् ॥ १२५ ॥
सुवासरे देवगिरा महैश्च । युधिष्ठिरेति प्रथिताभिधानः ॥
बभूव बालः स सतां जनानां । तथ्यैर्गुणैस्तुष्टिकरः कलाभृत् ॥ १२६ ॥
समीरणेनात्मगृहांगणांतः । संरोपितं द्राग् फलितं च कुन्ती ॥
स्वप्ने निशि स्वःफलदं विलोक्य । बुद्धा प्रकामं मुदमाजगाम ॥ १२७ ॥

P. P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वप्नानुभावाज्जगदुत्तमं सा । गर्भं दधौ मौक्तिकशुक्तिकेव ॥
विज्ञाय तत्पांडुनृपश्च तुष्टिं । पुनः प्रसत्तिं परमां जगाम ॥ १२८ ॥
असूत कुन्ती तनयं द्वितीयं । दुर्योधनात् त्रिप्रहरैश्च पश्चात् ॥
खे गीरभूद्वज्रवपुश्च भीमः । सुधर्मधीरग्रजभक्त एषः ॥ १२९ ॥
अथान्यदा क्वापि धराधरेन्द्रे । रन्तुं प्रवृत्ते किल पांडुभूपे ॥
कुन्ती कराब्जादपतद्धरायां । सुवज्रकायः शिशुभीमसेनः ॥ १३० ॥
पुरन्दरोन्मुक्तपवेः समाना—त्तत्पातघातादखिलाः शिलास्ताः ॥
चूर्णीबभूवुः सुतरां घरट्ट—योगाद्यथा मंजुलतण्डुला द्राग् ॥ १३१ ॥
सुवज्रकायोऽयमिदं वदन्तः । सुराः समादाय तमक्षतांगम् ॥
कुन्त्यै ददुः पुत्रमतः प्रमोदं । सागात्प्रकामं दयितेन साकम् ॥ १३२ ॥
पुनस्तृतीयं समयेऽथ कुन्ती । गर्भं बभाराद्भुतपुण्ययोगात् ॥
स्वप्ने गजारूढमियं सुरेन्द्रं विलोक्य बोधं समवाप चाशु ॥ १३३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दैत्याननेकान् दलयामि सद्यः । कोदण्डमारोप्य पुना रिपूणाम् ॥
वृक्षःस्थलं द्रागिह चूर्णयामी—त्याधत्त काले किल दोहदं सा ॥ १३४ ॥
पूर्णेऽथ काले जगदुत्तरं सा—सूनांगजं भास्करभानिभाङ्गम् ॥
श्रीइन्द्रपुत्रोऽर्जुन एष इत्या—मीद्भारती व्योमतले सुराणाम् ॥ १३५ ॥
सुरैर्विमुक्ता न्यपतत्सुमानां । वृष्टिस्तथा दुन्दुभयोऽनदन् खे ॥
स्वःसुन्दरीणां सह चारुनाट्यै—श्चक्रे महं पुत्रजनौ नरेन्द्रः ॥ १३६ ॥
मद्यामभूतां नकुलः कुलाब्धि—विधुस्तथा श्रीसहदेवनामा ॥
सुतावुभौ पांडुनरेन्द्रचन्द्र—स्तैः पञ्चभिर्भाति सुतैरवन्याम् ॥ १३७ ॥
क्रमेण पुत्रा धृतराष्ट्रराज्ञो—ऽभूवन् शतं शात्रवनाशनेशाः ॥
सर्वेऽपि शास्त्रोक्तकलाकलाप—केलीकला नन्दनचन्दनाभाः ॥ १३८ ॥
रेजे सुतैस्तैर्धृतराष्ट्रराजा । शतप्रमाणैः सुतरां शशीव ॥
विद्वेषि रामामुखपङ्कजौघ—म्लानिप्रदस्तारकवृन्दयुक्तः ॥ १३९ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यात्राकृतेऽन्येद्युरगात्तु नाशि–क्याख्यं पुरं पांडुयुताथ कुन्ती ॥
तीर्थेशचन्द्रप्रभचारुचैत्य—मकारयत्तत्र महन्नवीनम् ॥ १४० ॥

जिनार्चनारात्रिकनृत्यदाना—दिकां क्रियां सा सकलां विधाय ॥
तत्र स्वभर्त्रा सममाजगाम । पुरीं निजां पुण्यपवित्रगात्रा ॥ १४१ ॥

चन्द्रप्रभं तीर्थंकरं च नाशि—क्याख्ये पुरे ये प्रणमन्ती भक्त्या ॥
आगामिके जन्मनि बोधिबीजं । सम्प्राप्य ते यान्ती परां गतिं च ॥ १४२ ॥

"श्रीमद्धर्मसुतो युधिष्ठिर इति ख्यातः स्वयं सत्यवाक् ।
भीमोऽयं पवनात्मजः पवनवद्दुर्वारदोर्विक्रमः ॥
श्रीमानऽर्जुन एष विश्वविजयी ह्याखण्डलस्यात्मजो ।
दोष्मन्तौ सहदेवनामनकुलौ पंचाप्यमी पांडवाः॥१४३॥"

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इति तपागच्छाधिराजश्रीसोमसुन्दरसूरिसन्ताने श्रीलक्ष्मीसागरसूरिश्रीसुमतिसाधुसूरिपट्टप्र-
तिष्ठसम्प्रतिविजयमानश्रीहेमविमलसूरिराज्ये सकलवाचनाचार्यमण्डलीशिरोमणि-
श्रीसाधुविजयगणिशिष्यपरमाणुश्रीशुभवर्धनगणिविरचिते-
श्रीपांडवचरित्रे महाकाव्ये पांडवोत्पत्तिनाम
॥ प्रथमः सर्गः समाप्तः॥श्रीरस्तु ॥

---

## ॥ अथ द्वितीयः सर्गः प्रारभ्यते ॥

जगत्त्रयत्राधिपदह्वयाया--र्हते च सत्संस्मरणीयनाम्ने ॥
श्रीनेमये नम्रशचीवराय । नमोऽस्तु सन्मुक्तिरताय नित्यम् ॥ १ ॥
दुर्योधनाद्या धृतराष्ट्रपुत्रा--स्ते पांडवाः पांडुसुताश्च पंच ॥
कर्णस्तु सूतस्य सुतश्च सर्वे--ऽप्यखेलयन्नित्यमथो मिलित्वा ॥ २ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दुर्योधनस्तु छलतत्परात्मा । स्वखेलनैर्व्यथयति प्रकामम् ॥
श्रीपांडुपुत्रान् सरलस्वभावा—नहर्निशं रुद्धमतिः सबन्धुः ॥ ३ ॥
भीमः प्रकृत्यानिशमुद्धतात्मा । विमृश्य मायां शतकौरवाणाम् ॥
तान् कुट्टयत्यात्मबलेन सद्यो । दोर्दण्डवीर्यादपि नाशयेच ॥ ४ ॥
सुप्तं छलाद्भीममम्भुं निबध्य । ते दुर्धियश्चिक्षिपुरंभसि द्राग् ॥
क्षणात्प्रबुद्धः किल भीमसेनो । रज्जूनिमांस्त्रोटयति स्ववीर्यात् ॥ ५ ॥
सन्तर्जयन्त्येव रुषा समीर—सुतं सदा श्रीधृतराष्ट्रपुत्राः ॥
भीमस्तु सद्यो भुजपीडनैस्तान् । पराभवेद्विष्णुरिवासुरेन्द्रम् ॥ ६ ॥
भीमस्य भोज्ये विषमं विषं च । दुर्योधनो दुष्टमतिर्ददाति ॥
तदेव तत्प्राक्तनपुण्ययोगा—त्पीयूषतां याति तदद्भुतं च ॥ ७ ॥
यत्प्रत्यनीकं पवनात्मजस्य । चकार दुर्योधन एष रोषात् ॥
तत्तस्य जातं सकलं मुधैव । दानं प्रदत्तं हि यथा कुपात्रे ॥ ८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दुर्योधनाद्या धृतराष्ट्रपुत्रा । युधिष्ठिराद्याः किल पांडुपुत्राः ॥
कर्णस्तु सूतांगभवश्च विद्या—भ्यासं कृपाचार्यगुरोर्वितेनुः ॥ ९ ॥
प्रज्ञागुणेनाधिकतां गतौ तौ । कर्णाऽर्जुनावेषु च पाठकेषु ॥
द्वौ द्वेष्टि दुर्योधन एव कूट—चित्तश्च निःशंकतया सदैव ॥ १० ॥
तेषामनध्यायदिनेऽन्यदापत—त्क्रीडाकृतां कन्दुककोऽवटे स्फुटम् ॥
ततस्तदाकृष्टिविधौ गतौजस—स्ते कूपकण्ठे परितो भ्रमन्ती च ॥ ११ ॥
इतश्च तत्रागमदाशु विप्रो—ऽश्वत्थामपुत्रेण युतो भ्रमंश्च ॥
द्रोणो धनुर्वेदसमग्रवेत्ता । तानित्यवोचत्कुमरानशेषान् ॥ १२ ॥
सम्भूय कूपस्य कथं भवन्तः । कण्ठे स्थिता भो कुमरा विखिन्नाः ॥
निर्भागधेया इव पैत्रिकर्द्धि । संवेष्ट्य पुत्रा विगतोद्यमाश्च ॥ १३ ॥
पपात नः कन्दुक एष कूपे । प्रोक्तते कुमारैरिति तत्पुरस्तात् ॥
शरैरनुस्यूततति: क्षणेना—चकर्ष विप्रः स तु कन्दुकं तम् ॥ १४ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्येति विज्ञाय धनुर्धरत्वं । गङ्गासुतः कौतुककारि लोके ॥
तस्मै धनुर्वेदशिशिक्षया श्री—कृपाज्ञया ह्यर्पयदङ्गजांस्तान् ॥ १५ ॥
अदीप्यतामीषु ततो महोभिः । कर्णस्तु तारेषु यथा शशांकः ॥
भास्वानिवोस्रैरधिकं ततोऽपि । देदीप्यते शक्रसुतस्तु नित्यम् ॥ १६ ॥
संयोजने लालनकेऽथ शीघ्र—संकर्षणे दूरनिपातने च ॥
दृढप्रहारेऽपि यदेक एवा—ऽर्जुनोऽधिकस्तेषु बभूव नूनम् ॥ १७ ॥
क्षिपन्निजां दृष्टिमहर्निशं स । द्रोणः कुमारेषु बलोद्धतेषु ॥
विनीततायां भुजविक्रमे च । शौर्ये च पार्थं बहुमन्यतेस्म ॥ १८ ॥
प्रक्रीडतः शिष्यगणेन सार्कं । द्रोणस्य नद्यां पविपुत्रिकायाम् ॥
केनापि जीवेन जलोद्भवेन । क्रमः समाकर्षि बलेन सद्यः ॥ १९ ॥
फूत्कारमुच्चैर्विनयं विनेय–गणस्य जिज्ञासुरसौ चकार ॥
अधावतान्येष्वखिलेषु मान्द्यं । गतेषु हृद्भक्तिवशेन पार्थः ॥ २० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स शक्रसूनुः स्वशरासनस्य । प्रोच्चैष्टणत्काररवेण सद्यः ॥
अमोचयद् द्रोणगुरुं क्षणेन जन्तोस्ततः क्षुद्रतराच्च भक्त्या ॥ २१ ॥
तस्येदृशीं भक्तिमिदं च सर्वं । विलोक्य हृष्टः स गुरुर्गुणज्ञः ॥
द्विषन्तु मास्मिन्नितरे च मास्म । भूयान्मदोऽपीति शशंस नैनम् ॥ २२ ॥
रहस्त्वकार्षीदिति शक्रसूनो--र्द्रोणः पुरोऽन्येद्युरथ प्रतिज्ञाम् ॥
त्वत्तोऽपरं सुन्दर शिक्षयामि । धनुःकलां नो सकलां कदापि ॥ २३ ॥
धनुःकलां द्रोणमथैकलव्या--भिधः पुलिन्द्रः किल याचतेस्म ॥
द्रोणोऽवदन्नीचकुलोद्भवाय । तुभ्यं धनुर्वेदमहं न दास्ये ॥ २४ ॥
गुरोरभावे स ततश्चकार द्रोणस्य मूर्तिं मुदितो द्रुमाधः ॥
अभ्यस्तवानेष धनुःकलां तां । तत्साक्षिकं भक्तिरतः सदैव ॥ २५ ॥
तस्येति भक्तस्य गुरावहर्निशं । धनुःकलाभ्यासमलं वितन्वतः ॥
विचित्रपत्रोल्लिखनेऽतिलाघवं । बभूव विश्वाद्भुतकारि सत्वरम् ॥ २६ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्रान्यदा द्रोणयुतः समागात् । परिभ्रमन् शक्रसुतः कलावान् ॥
विलोक्य तत्रामितपत्रछेदा-दिकं द्रुतं स्वं गुरुमाबभाषे ॥ २७ ॥
नूनं धनुर्वेदमहं विना त्वां । नो शिक्षयामीतरमत्र शिष्यम् ॥
इति प्रतिज्ञा विहिता त्वया या । मुधैव सानेन निदर्शनेन ॥ २८ ॥
द्रोणोऽथ तं विस्मितहृद्बभाषे । वचो वृथा मे न हि पार्थ भूयते ॥
जाने ततोऽहं नृषु दैवतेषु । कोऽप्येष धन्वी खलु भूतलेऽभूत् ॥ २९ ॥
सुरोऽसुरो वा खचरो नरो वा । यः कश्चिदत्रास्ति धनुःकलाभृत् ॥
भूत्वा स सद्यः प्रकटः कलां तां । स्वीयां च मे दर्शयतु द्रुतं च ॥ ३० ॥
द्रोणोक्तमाकर्ण्य तदैकलव्य—स्तूणीरको दण्डधरः पुलिन्द्रः ॥
वनादुपागत्य गुरुं ननाम । साक्षादितो नाम निजं प्रजल्पन् ॥ ३१ ॥
अस्यां कलायां गुरुरस्ति ते कौ । भल्लः स तु द्रोणगिरेति नुन्नः ॥
श्रीद्रोण एवास्ति गुरुर्मदीयः । कोऽन्यः पुमानित्थमवोचदुच्चैः ॥ ३२ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

द्रोणः स एको गुरुरेव मेऽस्ति । मुदेत्युदित्वा स तदैव भिल्लः ॥
अदर्शयत्तामनयोरखण्ड—पुष्पार्चितां मृन्मयमूर्तिमाशु ॥ ३३ ॥

मृन्मूर्तिमुच्चैर्महितां स्वकीयां । पश्यन्नयं शक्रसुतोपमो मा ॥
भूयादिति द्रोणगुरुस्तमाह्वां—गुष्ठं गुरोर्दक्षिणमर्पय त्वम् ॥ ३४ ॥

स्वांगुष्ठमस्मै रभसा विकृत्य । ददौ च भक्त्या प्रणतिं चकार ॥
धनुःकला सा हि निजांगुलीभि—रभ्यस्यमानास्य बभूव भक्त्या ॥ ३५ ॥

अशिक्षयच्छक्रसुतस्य राधा—वेधं मुदा द्रोणगुरुर्गुणज्ञः ॥
अमुग्धधीभीमसुयोधनौ तौ । तद्वद्गदाभ्यासमकारयच्च ॥ ३६ ॥

शस्त्रेषु दक्षो नकुलो बभूव । युधिष्ठिरश्रीसहदेववीरौ ॥
तुल्यस्तु कर्णाऽर्जुनयोः किलाश्व—त्थामा स्वधाम्ना च भुजाबलेन ॥ ३७ ॥

द्रोणाज्ञया मञ्चकसञ्चयं श्री—गङ्गात्मजोऽन्येद्युरकारयत्सः ॥
मुदा रणारम्भदिदृक्षयाशु । महाभटानां निजपुत्रकाणाम् ॥ ३८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रीद्रोणपांडुधृतराष्ट्रगरिष्टगङ्गा—पुत्रेषु तत्र मुदितात्मसु संस्थितेषु ॥
द्रागाययुः सकलशास्त्रभृतः सुवीर्य—वर्या युधिष्ठिरमुखा निखिलाः कुमाराः ॥ ३९ ॥

सर्वेऽपि ते समररङ्गभृतः स्वशस्त्रा—भ्यासं भृशं सपदि संसदि दर्शयन्तः ॥
तं विस्मयं व्यरचयन् सकलक्षितीश—चित्तेषु यं सकलवेदिवरो विवेद ॥ ४० ॥

आसाद्य तत्रावसरं तु भीम—दुर्योधनौ वीरवरौ मिथश्च ॥
विरोधयन्तौ बलगर्वतोऽश्व—त्थाम्ना निषिद्धौ स्वगुरोर्निदेशात् ॥ ४१ ॥

भ्रूसंज्ञया स्वीयगुरोरथाभ्यु—त्तस्थौ मुदा शक्रसुतश्च नुन्नः ॥
निजैर्भुजास्फोटरवैर्नितांतं । संक्षोभयन् भूमिभृतां मनांसि ॥ ४२ ॥

श्रीअर्जुनोन्मुक्तशरौघपक्ष—वातैर्धुतक्षोणिधरैः खमासीत् ॥
खमेव नष्टग्रहतारकत्वात् । त्रस्यद्विस्यंदनचञ्चलाभ्रम् ॥ ४३ ॥

कलां जनाश्चर्यंकरीं च राधा—वेधस्य तस्येन्द्रसुतस्य दृष्ट्वा ॥
के के तदा भूपवराभुजङ्गा । न जातहर्षा दुधुवुः शिरांसि ॥ ४४ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

दुर्योधनप्रेरित एव कर्णः । स्वमश्वकात्कोपभरादुदस्थात् ॥
समुन्नतांभोधरवन्निनादं गर्जन् भुजास्फोटरवं वितन्वन् ॥ ४५ ॥
तत्तादृशं तस्य धनुर्धरत्वं । भुजाबलं च प्रविलोक्य हृष्टः ॥
दुर्योधनः शक्रसुतारयेऽस्मै । चम्पां पुरीं स्वर्गपुरीमिवादात् ॥ ४६ ॥
तत्रागमत्सारथिसूतनामा । कर्णेन भक्त्या पितुराननश्च ॥
निवेशितः सर्वनरेश्वराणां । ततः पुरस्ताद्बहुमानपूर्वम् ॥ ४७ ॥
क्रुद्धोऽर्जुनोऽथाह सुदुर्धरेण । भीमेन साकं च सुयोधनाय ॥
अस्मायरे हीनकुलोद्भवाय । चम्पा त्वया मूढ कथं प्रदत्ता ॥ ४८ ॥
अथ त्वदन्यायमहं सहिष्ये । ननं कुलाचारविवर्जितारे ॥
उक्त्वैवमास्फाल्य शरासनं स्व––मसज्जतां क्षिप्रमुभौ रणाय ॥ ४९ ॥
दुर्योधनः कर्णभटस्ततोऽन्ये । तन्मित्रभूपाश्च महाबलिष्ठाः ॥
युद्धाय मश्चात्क्षणतोऽवतेरुः । सुमल्लसद्वीररसा निकामम् ॥ ५० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेषां भुजास्फोटरवैस्तदा च । क्ष्वेडानिनादैः सदृढैः समन्तात् ॥
ययौ रविस्त्रस्ततुरङ्गमः किं । सद्योऽस्तभूभृच्छिखरान्तरा च ॥ ५१ ॥

एषां भटानां जगतां त्रयं मा—क्षोभीद्रणारम्भभरैरतीव ॥
इत्थं समुत्थाय गुरुर्गरिष्ठा—देतानपासारयदाहवाच्च ॥ ५२ ॥

इतश्च सूतो धृतराष्ट्रपृष्टः । प्रोचे मुदा कर्णकुलादिकं च ॥
गङ्गाप्रवाहे च मया सुपेटा—प्रतिष्ठितोऽसौ रभसेन लब्धः ॥ ५३ ॥

कुन्तीसुतोऽज्ञायि मयैष मुद्रा—रत्नाक्षराद्द्भुतदेहदीप्त्या ॥
ततो गृहीतः किल पद्मबन्धोः । स्वप्नोपदिष्टः स्फुटविक्रमश्च ॥ ५४ ॥

श्रुत्वेति हृष्टो धृतराष्ट्रराजा । कर्णं समादाय तनूजयुक्तः ॥
चित्ते भृशं मत्सरभृच्च पांडु—नृपात्मजेषु स्वगृहं जगाम ॥ ५५ ॥

गुणैरनन्यैरथ पांडवेषु । लोकोऽभवत्प्रीतिपदं हि यद्वत् ॥
विरागवांस्तद्वदभूच्च बाढं । दुर्योधनाद्येष्वनयादिदोषैः ॥ ५६ ॥

Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुशस्थलद्रङ्गमदात्सदेशं । परस्परं मत्सरनाशनार्थम् ॥
श्रीपांडुभूमान् धृतराष्ट्रभूप—तनूभवेभ्यः स्फुटधर्मशाली ॥ ५७ ॥

पांडुश्रीधृतराष्ट्रभीष्मगुरवः पर्षत्समक्षं मुदा—न्योन्यं दोर्बलमण्डलस्य विविधां दक्षाः परीक्षामिमाम् ॥
कृत्वा पांडुभुवां सुयोधननृपादीनां सुतानां तथा । सद्यः स्वीयगृहांगणेषु सुतरां हृष्टाशयाश्चाययुः॥५८॥

इति तपागच्छाधिराजश्रीसोमसुन्दरसूरिसन्ताने सकलवाचनाचार्यशिरोमणिश्रीसाधु-
विजयगणिशिष्यपरमाणुपण्डितश्रीशुभवर्धनगणिविरचिते श्रीपांडवचरित्रे
महाकाव्ये पांडवकौरवीयविद्याभ्यास बलपरीक्षावर्णनोनाम
॥ द्वितीयः सर्गः समाप्तः ॥ श्रीरस्तु ॥

## ॥ अथ तृतीयः सर्गः प्रारभ्यते ॥

अथान्यदा दिव्यसभानिविष्टं । श्रीपांडुभूपं द्रुपदस्य राज्ञः ॥
स्ववेत्रिविज्ञप्त इह प्रणम्य । व्यजिज्ञपत्तुष्टमनाश्च दूतः ॥ १ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूमीपतेः श्रीद्रुपदस्य नेतः । सुकुक्षिजा श्रीचुलनाजनन्याः ॥
जगज्जनाश्चर्यकरैकरूपा—स्ति द्रौपदीनामसुता वरेण्या ॥ २ ॥

सर्वे दशार्हा बलशौरियुक्ता । रुक्मी तथा श्रीशिशुपालकर्णौ ॥
सुयोधनो वै दमदन्तनामा । महौजसोऽन्ये तनया नृपाणाम् ॥

स्वयंवरेऽस्या द्रुपदेन राज्ञा—हूताश्चरैरायुरत्र सद्यः ॥
अलंकुरु त्वं तनयैरमीभिः । स्वयंवरं मण्डपमेत्य तं द्राग् ॥ ४ ॥युग्मम्॥

सैन्यैरगण्यैः सह पञ्चभिश्च ।पुत्रैः पवित्रैः खलु पांडुभूपः ॥
वाद्येषु सर्वेषु ततश्च वाद्य—मानेषु कांपिल्यपुरं जगाम ॥ ५ ॥

ज्ञात्वा गतं पांडुनृपं सपुत्रं । हृष्टः स्वचित्त द्रुपदः क्षितीशः ॥
पुरप्रवेशं सुमहोत्सवैश्च । चक्रेऽतिवक्रेतरचित्तभावः ॥ ६ ॥

सच्चंदनागुरुसुकाष्ठभरैश्च रत्न—माणिक्यहेमकलधौतभरैरुदारैः ॥
तत्राभवत्सपदि मञ्चकसञ्चयश्च । शोभाविनिर्जितविमानवराभिमानः ॥ ७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्र प्रतिद्वारमिमेषु मञ्चा--स्पदेषु रेजुर्वरतोरणानि ॥
कामेन कामं त्रिजगद्विजेतुं । सज्जीकृतानीन्द्रधनूंषि किं वा ॥ ८ ॥
सौवर्णसिंहासनमञ्चकेषु । तत्रावनीपालसुता निविष्टाः ॥
विरेजिरे दिव्यविमानसंस्था । यथा सुरेन्द्रास्तनुदीप्तिमन्तः ॥ ९ ॥

तत्रावनीपालसुतेषु तेषु । सुतोत्तमैस्तः किल पञ्चसंख्यैः ॥
पांडुर्नरेन्द्रः शुशुभेऽधिकं च । शरैरुदारैरिव मन्मथोऽयम् ॥ १० ॥

क्षीरोदवस्त्रावरणा समग्रा–लङ्कारमालां दधती मनोज्ञाम् ॥
पूर्णेन्दुवक्त्रा गजगामिनी च । रूपश्रिया निर्जितकामपत्नी ॥ ११ ॥

स्नातार्चितार्हत्प्रतिमा समेत्या–थ द्रौपदी स्तम्भतटे निषण्णा ॥
पितुः पुरस्ताद्वरमालिकां स्वे । पाणौ दधाना सह चेटिकाभिः ॥ १२ ॥ युग्मं ॥
इतश्च भूपद्रुपदस्तदैव । धनुः समानीय रयेण वेद्या ॥
राधामहास्तम्भसमीपसंस्थः । सर्वावनीशानिति संबभाषे ॥ १३ ॥



Pu. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भो भो नरेन्द्राः शृणुतेति चक्र--मत्यद्भुतं स्तम्भपुरो यदस्ति ॥
भ्रमन्त्यमी द्वादश बन्धुरारा--स्तस्योच्चकैर्दक्षिणवामपार्श्वे ॥ १४ ॥

सर्पिःकटाहे प्रतिबिम्बितं च । दृष्ट्वाथ भित्वा स्वशरैश्च चक्रम् ॥
राधामिमां विध्यतु वीर्यशाली । यः कश्चन क्षोणिभृतां धनुष्मान् ॥ १५ ॥

समुद्वहत्वेष सुवीरमानी । सर्वाङ्गनामण्डलमौलिरत्नम् ॥
महासतीं भाग्यभरेण राधा—पणीकृतां श्रीद्रुपदांगजां ताम् ॥ १६ ॥

धनुःधृतौ न प्रभवश्च केऽपि । नारोपणे केऽपि नृपाः समर्थाः ॥
विज्ञाय सामर्थ्यमथ स्वकीयं । तथैव केऽप्यस्थुरहो सलज्जाः ॥ १७ ॥

इतोऽर्जुनः सर्वधनुर्धराग्रणीः । श्रीभीमसेनेन समं च दोष्मता ॥
मञ्चादथोत्तीर्य मृगेन्द्रवद्बली । मुदानमच्चक्रमिदं च दैवतम् ॥ १८ ॥

लज्जावनम्रात्ममुखांबुजानां । द्रागपश्यतां भूमिभृतां पुरस्तात् ॥
स्वपाणिना वज्रनिभेन तेषां । मानेन सार्धं धनुरग्रहीत्सः ॥ १९ ॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

दिशां पतीनूर्ध्वकरस्ततोऽसौ । जगाद बाढं किल भीमसेनः ॥
निःशेषभूभारधृतौ भव त्वं । सुनिश्चलः शेषभुजङ्गमाहे ॥ २० ॥
भोमो महेन्द्राग्नियमानिलेश—विरंचिमुख्याः किल लोकपालाः ॥
तमस्तविश्वस्थितितत्पराश्च । यूयं स्थिराः पश्यत सावधानाः ॥ २१ ॥
उच्चैर्धनुर्ध्वानविधानपाद—न्यासैरमन्दैर्मम बन्धुरेषः ॥
समग्रभूमीपतिवर्गवत्स । धनुर्दृढं नामयिता किल द्राग् ॥ २२ ॥
धनुः समारोप्य ततो बलेन । दृष्टिभिरिन्द्रस्य सुतश्च तेषाम् ॥
समग्रभूपालसभासमक्ष—मूर्ध्वं चकर्षाद्भुतलाघवेन ॥ २३ ॥
सुनिष्ठुरं चारुधनुर्निनादै—र्बाधिर्यकृद्भिः श्रवणद्वयस्य ॥
सद्यः प्रसुप्तं भुवि कातरौघै—स्त्रस्तं पुनर्भीरुभिरंजसा हि ॥ २४ ॥
सन्तप्तसर्पिर्भरदत्तदृष्टि—श्चक्रान्तराले प्रतिबिम्बितां ताम् ॥
विलोक्य चारान्तरसौ स्वबाणं । मुक्त्वा विवेधाशु सभासमक्षम् ॥ २५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जयजयेति रवः प्रकटोऽभव--द्दिवि तथा सुरन्दुदुभिरध्वनत् ॥
कुसुमवर्षणमाशु तदा मुदा । विरचितं त्रिदशैरभितस्ततः ॥ २६ ॥
जातानुरागा द्रुपदस्य पुत्री । चिक्षेप कण्ठेऽर्जुनपांडवस्य ॥
ततोऽतिवेगाद्वरमालिकां तां । कदापि निष्पुण्यजनैरलभ्याम् ॥ २७ ॥
तत्कालमेकापि च पञ्चधा सा । भूत्वाथ माला वरणस्य नूनम् ॥
स्थिताधिकण्ठं समपांडवेषु । सत्यं मनःशक्तिरिवेन्द्रियेषु ॥ २८ ॥
पञ्चापि नूनं विषयाश्रया यथा । सच्चेतनां शिश्रियुरादरेण ॥
अमी तथा पांडुसुताः प्रियामिमा--मित्यानृशंश्चेतसि भूधवा न के ॥ २९ ॥
गङ्गात्मजे चेतसि लज्जमाने । विच्छाय वक्त्रे द्रुपदे नरेन्द्रे ॥
शेषेषु लोकेषु सविस्मयेषु । ज्ञानी मुनिः कश्चिदुपाययौ च ॥ ३० ॥
अस्याः सुमुख्याः खलु पञ्च नाथाः । किमु स्युरित्थं हरिमुख्यभूपैः ॥
स चारणर्षी रभसेन पृष्टः । स्पष्टं जगादेति परोपकृत्यै ॥ ३१ ॥

P.P. Ac. Gunratnasuri M.S.                    Jun Gun Aaradhak Trust

प्राग्जन्मबद्धेन कुकर्मणेयं । नूनं वरा द्रौपदी पञ्चभर्तृका ॥
भविष्यतीत्यद्भुतमत्र किं वः । कुकर्मणां यद्विषमा गतिश्च ॥ ३२ ॥

चम्पानगर्यां सुकुमारिकाख्या । सुश्रेष्ठिनः सागरदत्तनाम्नः ॥
सुता सुभद्रावरकुक्षिजाता । निःशेषदौर्भाग्यपदं बभूव ॥ ३३ ॥

सा यौवने सागरसूनुनेभ्य—वयस्य हर्षाज्जिनदत्तनाम्नः ॥
अथोपयेमे स तया च सार्धं—मशिश्रयत्तल्पमनाकुलश्च ॥ ३४ ॥

निद्रायमाणं दयितामिमां स । मुक्त्वा च नष्ट्वा स्वगृहे जगाम ॥
पतिं निजं साप्यविलोकयन्ती । निद्राविरामे सुतरां रुरोद ॥ ३५ ॥

दुर्गंधदेहामथ तां सुतां स्वां । ज्ञात्वा ततः सागरमोक्षणेन ॥
अस्थापयद्दानपरां स्वकीये । गेहे मुदा सागरदत्तनामा ॥ ३६ ॥

गोपालिकाया सविधे व्रतं सा—ऽन्यदा ललौ भूरिविरागयोगात् ॥
चतुर्थषष्ठाष्टममुख्यमेषा । तपो विचित्रं सततं चकार ॥ ३७ ॥



P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

ग्रीष्मेऽन्यदार्यविनिवारितापि । तपस्विनी सा विपिनस्थिता च ॥
परीषहं सोढुमनाश्चिरेण । ह्यातापनामातनुतेस्म नित्यम् ॥ ३८ ॥

तत्र स्थितां पञ्चभिरन्यदा नृभिः । पुरस्कृतां सप्रणयैः स्मरातुरैः ॥
सा देवदत्तां च ददर्श वारां—गनां श्रिया निर्जितकामयोषितम् ॥ ३९ ॥

कदाप्यसम्पूर्णरताभिलाषा । चित्ते निदानं व्रतिनीति चक्रे ॥
भूयांसमागामिभवे ह्यमीभि—स्तपोभरैः पञ्चसुभर्तृकाहम् ॥ ४० ॥

कृताष्टमा सा ह्यतिचारमुक्ता । संलेखनां कर्मविभेदिनीं च ॥
मृता ह्यनालोच्य नवप्रमाण—पल्याद्यकल्पेऽजनि दिव्यदेवी ॥ ४१ ॥

च्युत्वाथ साभूद् द्रुपदात्मजेयं । तत्कर्मणा पूर्वभवार्जितेन ॥
अमी ततोऽस्याः पतयो हि पञ्च । जातास्ततः कस्तव विस्मयोऽत्र ॥ ४२ ॥

मुनीन्द्रवाक्यादिति साधुसाधु । व्योम्नीति वाणी प्रकटीबभूव ॥
कृष्णादयः प्राहुरिदं ततोऽस्याः । सुवल्लभा साधु बभूवुरेते ॥ ४४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तैरेव राजस्वजनैः स्वयंवरा—गतैः समक्षं विहितोत्सवं ततः ॥
द्राग् पर्यणेषुर्द्रुपदात्मजामिमां । ते पांडवाः पांडुनिदेशतो मुदा ॥ ४५ ॥

ततः स पांडुक्षितिभृद्दशार्हा—स्तान् कृष्णमन्यांश्च नरेन्द्रचन्द्रान् ॥
कामं विवाहार्थमिहागतान् द्राग् । सुगौरवादात्मपुरेऽनयच्च ॥ ४६ ॥

अथार्चितः श्रीद्रुपदेन राज्ञा । पांडुर्नरेन्द्रः सममात्मपुत्रैः ॥
महोत्सवैस्तैरथ हस्तिनाख्यं । पुनः स्वकीयं पुरमाससाद ॥ ४७ ॥

इतोऽन्यदा धर्मसुते निषण्णे । निवासगेहे द्रुपदात्मजायाः ॥
सुकामचारो भुवि नारदर्षि—स्तेनार्चितस्तत्र समागमच्च ॥ ४८ ॥

प्रीतस्ततो नारदतापसेन्द्रः । शेषान् समाहूय च पांडुपुत्रान् ॥
पांचालिकेयं समये निषेव्या । सर्वैरिति द्रागकरोद्व्यवस्थाम् ॥ ४९ ॥

युष्माकमेकोऽपि यदीह यायात् । सत्येकके भ्रातरि वासगेहे ॥
वर्षाणि स द्वादश तीर्थवासी । भविष्यति क्षिप्रमिति व्यवस्था ॥ ५० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्र स्थिते धर्मसुतेऽन्यदाथा—ऽजानन् सुराधीशसुतस्तु गच्छन् ॥
व्यावृत्य यात्राकृतये स सत्य—संघोऽचलद्बन्धुनिवारितोऽपि ॥ ५१ ॥

तीर्थेषु सर्वेषु ततो नमस्यन् । जिनेश्वराणां प्रतिमा मुदासौ ॥
क्रमेण वैताढ्यनगेन्द्रमाप्य । तत्रादिमं तीर्थकरं ननाम ॥ ५२ ॥

विद्याधरः कश्चिदितश्च तत्र । गच्छन् निकामं विधुरश्च पृष्टः ॥
कथं सशोकः खलु दृश्यसे भोः । शक्रस्य पुत्रेण जगाविति द्राग् ॥ ५३ ॥

वैताढ्यशैले मणिचूडनामा । सदुत्तरश्रेणिपतिर्नृपोऽहम् ॥
लात्वा हि राज्यं रिपुणा द्रुतं मे । निष्कासितस्तेन विषण्णचित्तः ॥ ५४ ॥

श्रुत्वेति पार्थोऽपि विजित्य तस्य । रिपुं दयार्द्रः स्वबलेन तूर्णम् ॥
समेत्य सार्धं च पुरीं तदीया—मस्थापयत्तं पुनरेव राज्ये ॥ ५५ ॥

हेमांगदश्रीमणिचूडमुख्यै—र्विद्याधरेन्द्रैश्च निषेव्यमानः ॥
स्थित्वा कियत्कालमिहैव शक्र—सुतोऽचलद्दिव्यविमानसंस्थः ॥ ५६ ॥

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

अष्टापदाद्येषु पवित्रभूषु । तीर्थेषु सर्वेषु नमन् जिनेन्द्रान् ॥
संतुष्टचित्तः किल शक्रसूनु—र्ययौ मुदा रैवतकाचलेन्द्रम् ॥ ५७ ॥
श्रीश्रीपुरे क्षत्रमितश्च पूर्वं । बभूव भूमौ पृथुराख्यया च ॥
ख्याता सुदुर्गं धतया च दुर्गं—धा तस्य पुत्री स्वककर्मदोषात् ॥ ५८ ॥
उपायतान्येद्युरिमां च सोम—देवः प्रदत्तां जनकेन मोदात् ॥
तदीयदुर्गन्धविरक्तचित्त—श्छन्नं निशायां स ययौ रयेण ॥ ५९ ॥
पित्रोरपि द्वेषपदं स्वभर्तु—र्द्वेषाद्बभूवेयमतो विमुक्ता ॥
स्वबन्धुवर्गेण यतः स्वभर्तृ—प्रीत्यैव सर्वत्र हि पूज्यते स्त्री ॥ ६० ॥
सर्वत्र सैवं च पराभिभूता । त्यक्त्वा निशायां निजगेहमाशु ॥
बभ्राम दुःकर्मविनाशनाय । तीर्थेषु सर्वेषु च सोद्यमांगी ॥ ६१ ॥
प्राचीनकर्मक्षय एषु न स्या—दितीव विज्ञाय सुदुःखिनी सा ॥
झंपाप्रदानाय समुद्यताभूद् । द्रागमतुंकामो न भवेत्किमार्त्तः ॥ ६२ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यांत्यन्यदान्तर्विपिनं ततः सा । जटाधरं वल्कलिनं यतीन्द्रम् ॥
दृष्ट्वा नमत्सोऽपि निकाममस्या । दुर्गन्धयोगेन पराङ्मुखोऽभूत् ॥ ६४ ॥

तमाह सा वीक्ष्य तथा मुनीन्द्रम् । मुनिर्ममस्त्वं च भवन् कथं माम् ॥
व्यावर्तयस्यद्य समस्ति कोऽन्य—स्त्राता त्रिलोक्याममितांहसो मे ॥ ६५ ॥

ततस्तपस्वी पुनराह वत्से । त्रिकालवेदी गुरुरस्ति मेऽत्र ॥
प्रतिक्रियामेष तवैव कर्ता । गत्वा तमाख्याहि ततः स्वभक्त्या ॥ ६६ ॥

ततो निशम्येति तपोधनांघ्रि—सेवापरा तत्र च काननांतः ॥
ध्यायन्तमन्तर्वृषभं जिनेन्द्रम् । जटाधरं तं मुनिमानमत्सा ॥ ६७ ॥

दुर्गन्धतोऽस्या गुरुरेष वक्री—कृत्य स्वनासं च कुशासने ताम् ॥
दुर्गन्धदेहां विनियान्निविष्टा—मेवं जगादामितपापहन्ता ॥ ६८ ॥

दुर्गन्धदोषाद्विधुरासि किं वा । किमागता त्वं विपिनेऽत्र सद्यः ॥
दुर्गन्धपूरस्तव देहजोऽयं । विजृंभते किं जनदुःखदायी ॥ ६९ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

श्रुत्वैवमश्रूणि भृशं विमुंचं--त्युवाच सेति व्यथिताथ दुःखैः ॥
वाचंयम प्राच्यकुकर्मयोगाद् । दुर्गन्ध एषः प्रसरीसरीति ॥ ७० ॥
आबाल्यकालादपि दुःखिताहं । त्यक्ता स्वभर्त्राथ कुगन्धदोषात् ॥
समस्ततीर्थेष्वहमभ्रमं च । परं ममाद्यापि न तत्क्षयोऽभूत् ॥ ७१ ॥
आधार एवासि सुधर्मदानान्नूनं जनानामनिशं मुनीश ॥
प्राग्जन्मपापात् किल दुःखितां त्वं । भवांबुधेस्तारय मां क्षणेन ॥ ७२ ॥
वाचंयमः सोऽपि पुनर्जगाद । ज्ञानं न मे तादृशमस्ति वत्से ॥
तथापि शत्रुञ्जयमध्यगे त्वं । श्रीरैवताख्ये व्रज भूधरित्रे ॥ ७३ ॥
पानीयमानीय गजेन्द्रपाद--कुंडादिह ज्ञानिवरोपदिष्टात् ॥
स्नानं च कुर्याद्भवती सती त्वं । सदा दधाना जिनभक्तियुक्ता ॥ ७४ ॥
श्रुत्वेति तद्वाक्यमियं शमीश--पादौ प्रणम्याचलपुण्डरीकम् ॥
कृत्वा स्वचित्ते गिरिनारशैलं--प्रति प्रमोदेन चचाल बाला ॥ ७५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नित्यं चलन्ती कतिभिर्दिनैः सा । श्रीपुंडरीकाचलतीर्थमाप ॥
तत्रादिदेवं कृतविश्वसेवं । विलोक्य हृष्टा प्रणनाम सा च ॥ ७६ ॥

प्रदक्षिणीकृत्य ततस्तमद्रिं । चचाल सा सत्वरमुज्जयन्ते ॥
शिवाङ्गजं तीर्थंकरं च नन्तुं । हन्तुं पुराचीर्णकुकर्मराशिम् ॥ ७७ ॥

सा पद्यया चोन्नतया नगेन्द्र—मारुह्य तं शुद्धतरस्वभावा ॥
ततः समासाद्य गजेन्द्रपादा—ख्यं कुण्डमेषा मुदमाजगाम ॥ ७८ ॥

अर्हद्विहारे त्विभपादकुण्डे । प्रवेशनं कर्तुमलं ह्यशक्ता ॥
पानीयमानाय्य बहिः स्थिता सा स्नानं चरीकर्ति सुवासना च ॥ ७९ ॥

बभूव सा सप्तदिनैः सुगन्ध—देहा स्वदुर्गन्धविनाशतो हि ॥
ततः समुद्भूतहृदेकभक्ति—रचीकृतेऽगाज्जिनमन्दिरे सा ॥ ८० ॥

तत्र स्थितः शक्रसुतस्तदा चा—र्हत्पूजनानन्तरमेव तस्याः ॥
पूर्वं भवं ज्ञानधरेण कथ्य—मानं शृणोतिस्म सविस्मयश्च ॥ ८१ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

प्राग्जन्मनि त्वं यदभूर्द्विजेश—कुलप्रसूता जिनधर्ममुक्ता ॥
मुनीश्वरं जैनमिति द्विषन्त्य—वादीः सहासं स्वसखीपुरस्तात् ॥ ८२ ॥

सदा जलस्नानविवर्जितत्वा—दिमे यतीशाश्च वनौकसोऽपि ॥
शुभ्राण्यमून्यंबरकाणि नूनं । प्रकुर्वते हा मलिनानि कामम् ॥ ८३ ॥

शुश्राव सापि स्वकरौ कटीं च । द्राग्मोटयन्ती वदनं स्वकीयम् ॥
यदर्जितं तीव्रकुकर्म वत्से । ततस्त्वयाकर्णय तत्फलं हि ॥ ८४ ॥

जातासि मृत्वा नरके ततश्च । योनावभूस्त्वंत्यजवंशजातेः ॥
ग्रामेऽथ शूकर्यभवस्ततस्त्वं । ततः क्रमात्त्वं किल मानुषी स्त्री ॥ ८५ ॥

तत्रापि नाम्ना परिणामतश्च । दुर्गन्धदेहा विदिताभवश्च ॥
भवेऽत्र भ्रांत्वा विपदां पदं त्वं । दुःकर्मणा किं लभते न जीवः ॥ ८६ ॥युग्मम्॥

यो योगिनामस्ति जिनः सुपूज्यः । श्रेष्ठस्त्रिलोकी तलवासिनां च ॥
निंद्याः कथं स्युर्मनुजास्तदीय—मुद्राभृतो निःक्रियका अपीह ॥ ८७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ये भूरिमिथ्यात्वविनाशका ये । महाव्रतश्रीधरणे समर्थाः ॥
येऽर्हन्मताम्भोजविकाशनार्का । निन्द्याः कथं ते मुनयस्त्रिलोक्याम् ॥ ८८ ॥
क्षिप्त्वाऽथ कर्माण्यखिलानि तीर्थ—प्रभावतस्त्वं सुभगा भवित्री ॥
श्रीतीर्थसेवामनिशं कुरु त्वं । क्षिप्रं ततः प्राप्स्यसि बोधिबीजम् ॥ ८९ ॥
एवं गदित्वा विरतेऽथ तस्मिन् । दुर्गन्धदेहापि सुरेन्द्रसूनुः ॥
प्रणेमतुस्तीर्थकरं गुरुं च । तीर्थप्रभावं मुदितौ च मत्वा ॥ ९० ॥
तीर्थेऽथ तस्मिन्नचिरेण धन्यं—मन्योऽर्जुनः शुभ्रतरस्वभावः ॥
मित्रेण साकं मणिचूडनाम्ना । हर्षादतिष्ठद्दिवसत्रयं च ॥ ९१ ॥
ज्ञात्वा विदग्धं तमथो मुकुन्दः । पुरीं समाकार्य ततः सुभद्राम् ॥
ददौ मुदास्मै भगिनीं स्वकीयां । परस्परं प्रीतिविवृद्धये च ॥ ९२ ॥
शत्रुञ्जयाष्टापदतीर्थयोश्च । स आदशाब्दीममरेन्द्रसूनुः ॥
अस्थात् स्वकर्मक्षतये प्रमोदा—दन्येषु तीर्थेषु च पूतदेहः ॥ ९३ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ततः समा निजां प्रतिज्ञां । विद्याधरेन्द्रैरमितैः समं सः ॥
आच्छादयन् व्योम निजैर्विमानैः । श्रीहस्तिनाद्रङ्गमगाच्च पार्थः ॥ ९४ ॥
ज्ञात्वा तमायान्तमथो सभार्यः । पांडुः समं तैस्तनयैश्चतुर्भिः ॥
पार्थस्य सोत्कंठमनाः प्रवेशो—त्सवं मुदाकारयदप्रमत्तः ॥ ९५ ॥
प्रभावतीं द्राग्भगिनीं तदैव । विद्याभृतः श्रीमणिचूडनाम्नः ॥
हृतां छलात्केचन खेचरेण । ततः शृणोतिस्म सुरेन्द्रसूनुः ॥ ९६ ॥
पार्थोऽथ सार्धं मणिचूडविद्या—भृतो द्रुतं न्यायपथा बलीयान् ॥
गत्वा च हत्वा तमरिं बलेन । प्रभावतीमानयतिस्म पश्चात् ॥ ९७ ॥
नभो नभो रत्नरुचा यथाशुभत् । यथा ध्वजेन प्रवरः सुरालयः ॥
यशःपवित्रेण तथा महात्मना । युधिष्ठिरेणापि बभौ भृशं जगत् ॥ ९८ ॥
अस्यैव भीमप्रमुखाश्च बन्धवः । सैन्यैः समं सर्वदिशो विजित्य च ॥
युधिष्ठिराज्ञावशतः क्षितीश्वरैः । सहागमन् स्वीयपुरे महामहम् ॥ ९९ ॥



© P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रीधर्मपुत्रादिकपांडवानां । क्रमेण जाता द्रुपदात्मजायाम् ॥
पुत्राः पवित्राः किल पञ्च पञ्चा—ननोपमा भूरितमौजसा च ॥ ९९ ॥
सुबन्धुवत्पत्तिवदङ्गजन्मवत् । सुमित्रवद्धारुनिजांगवच्च ॥
युधिष्ठिरस्यात्मसहोदरास्ते । नातिक्रमन्तिस्म कदापि मुद्राम् ॥ १०० ॥
तत्प्रीतितः श्रीमणिचूडनामा । विद्याबलात्खेचरराड् नवीनाम् ॥
आखण्डलाखण्डसभानिभां द्राग्मनोहराभां च सभां चकार ॥ १ ॥
सुनिर्मलास्तत्र महामणीनां । स्तम्भा बभुर्विस्मयकारिशोभाः ॥
दिव्यस्वरूपाः किल शालभंज्यः । सुरत्नमय्योऽप्सरसां समानाः ॥ २ ॥
स्नेहादिह श्रीमणिचूडविद्या—धरः सुवर्णासनसंस्थितं द्राग् ॥
युधिष्ठिरं बन्धुनिभं विधाय । मैत्रीं स्वकीयां सफलां व्यधाच्च ॥ ३ ॥
इतश्च तीर्थाधिपतेश्च शांते—रकारयत्तत्र नवं विहारम् ॥
श्रीधर्मपुत्रः कनकस्य मूर्तिं । स्वश्रेयसेऽनर्घ्यमणिप्रशस्याम् ॥ ४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कल्याणकानां त्रितयं च यत्र । बभूव शान्तेस्त्रिजगत्पतेस्य ॥
तद्धस्तिनागाख्यमनेन तीर्थ—मस्थापि विश्वत्रयपुण्यहेतुः ॥ ५ ॥
स दिग्जयानीतसमग्रलक्ष्मी—स्ववेल्लिकायाः फलमुत्तमं तत् ॥
क्राग्मन्यमानो धरणीधवोऽसौ । तत्राकरोत्प्रौढमहोत्सवं च ॥ ६ ॥
तथा दशार्हा बलदेवकृष्णा—वन्ये च भूपा द्रुपदश्च भूमान् ॥
आकारितास्तेन समागमंश्च । चैत्यप्रतिष्ठासमये महाय ॥ ७ ॥
अथो निषण्णेषु नृपेषु तेषु । तत्रामितस्तंभसुचित्रितेषु ॥
तत्रागमद्बन्धुयुतः क्षितीशा—हूतः ससैन्यः खलु धार्तराष्ट्रः ॥ ८ ॥
सयादवान् पांडुसुतांश्च रत्न—सिंहासनस्थानिह निर्मलत्वात् ॥
कामं नभःस्थानिव सोऽथ वीक्ष्य । विसिस्मये चेतसि धार्तराष्ट्रः ॥ ९ ॥
सनीलकुट्टिमतले जलशङ्कया स । सङ्कोचयन् वसनमाशु सबन्धुरेषः ॥
सुस्फाटिके तु सुतरां गगनस्य बुद्ध्या । कुर्वन् समुत्प्लुतिगतिं हसितः क्षितीशैः ॥ १० ॥



P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तथास्फलन्निर्मलरत्नभित्तौ । संक्रान्तमूर्तिष्ववनीश्वरेषु ॥
सुभ्रान्तिमानेष पुनः प्रवेशं । कुर्वन्न कैः कैर्हसितो नरेन्द्रैः ॥ ११ ॥

सुखाप्यशीतः किल सूर्यकांत—वद्वारणीशाखिवदेष नूनम् ॥
अन्तःस्फुरत्क्रोधदवाग्नियुक्तः । सुयोधनस्तत्र महं चकार ॥ १२ ॥

श्रीधर्मपुत्रेऽमितदानशौंडे । तदा समग्राः सुरपादपाद्याः ॥
तथा सुलज्जानिभृता यथामी । सद्यः सुमेरोः शिखरेषु जग्मुः ॥ १३ ॥

सर्वस्य धर्मस्य दयैव मूल—मेवं विचिन्त्याथ युधिष्ठिरश्च ॥
अप्रोगयद्वारणसाधुमुख्यान् । मुनीन्नृपादीनखिलांश्च दानैः ॥ १४ ॥

सुयोधनोऽपि स्वकबन्धुयुक्तः । सुसत्कृतो भूषणवस्त्रमुख्यैः ॥
प्राप्यात्मनः श्रीनगरं स्वपित्रा । समातुलेनेत्यमृशत् सुगूढम् ॥ १५ ॥

आबाल्यकालात्किल पांडुपुत्रा । अमी प्रकामं कपटे पटिष्ठाः ॥
शठाः स्वगेहे हृदयेऽतिदुष्टा । बहिर्भृशं कोमलवाग्विलासाः ॥ १६ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एतैः सगर्वैः किल रामकृष्णा—भ्यामेव साम्राज्यमदोद्धतैश्च ॥
विचेष्टितं यन्मयि तत्र पूज्या—स्तच्छल्यवन्मे हृदयं दुनोति ॥ १७ ॥
छलादपि स्वीयबलादपीह । साध्योऽथ वैरीति नयोऽस्ति लोके ॥
ततो हरिष्यामि हि पांडवेभ्यः । स्वामर्षपोषाय समग्रराज्यम् ॥ १८ ॥
उक्त्वेति शिल्पिप्रकरैः सुरम्यां । सभां नवीनां धनकोटिभिः प्राक् ॥
स कारयामास मुदा तदीय—स्पर्धानिबद्धात्ममनाः सगर्वः ॥ १९ ॥
मुदा तदा लोकनकौतुकाय । तदा दशार्हान् किल पांडुपुत्रान् ॥
श्रीरामकृष्णावितरान्नरेन्द्रा—नाकारयत्तत्र सुयोधनश्च ॥ २० ॥
तीर्थस्थापनपात्रपोषणमहद्दानप्रदानादिभि—र्विश्वाश्चर्यकरैस्तथा जिनपतिस्पष्टप्रतिष्ठोत्सवैः ॥
सत्पुण्यैर्मुदिताशयाः किल समाहूताश्चरैः पांडवाः । सम्प्राप्ता रभसा सुयोधनपुरि प्रौढप्रवेशोत्सवैः॥२१॥

इति तपागच्छाधिराजश्रीसोमसुन्दरसूरिसन्ताने सकलवाचनाचार्यमण्डलीशिरोमणिपण्डितश्रीसाधुविजयगणिशिष्यपरमाणुपण्डितश्रीशुभवर्धनगणिभि-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विरचिते श्रीपांडवचरित्रे महाकाव्ये द्रौपदीस्वयंवरार्जुन
राधावेधसाधनपाणिग्रहणादिवर्णनो नाम
तृतीयः सर्गः समाप्तः॥श्रीरस्तु ॥

## ॥ अथ चतुर्थः सर्गः प्रारभ्यते ॥

अथातिहृष्टश्च सुयोधनः स्वैः । सहोदरैः कृत्रिममानदायी ॥
तेषां च सत्कारविशेषदान—भक्तादिभिस्तोषमलंचकार ॥ १ ॥

भोज्यादिसद्भक्तिमहावनैक—क्रीडापयोयन्त्रकुतूहलैश्च ॥
तान् पांडवानात्मवशे विधाय । न्यमन्त्रयद् द्यूतकृते सदम्भः ॥ २ ॥

निषेधितः श्रीविदुरेण धर्म—धर्मप्रवीणेन गुणानुरागात् ॥
स्वकर्मदोषान्निरराम नैव । द्यूतादथज्ञोऽपि स धर्मपुत्रः ॥ ३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दीव्यंश्छलेनैव स धार्तराष्ट्रः । कामं स्वदैवस्य विपर्ययेण ॥
नो लक्षितः पांडुसुतैः समग्र—कलाप्रवीणैरपि शुद्धभावैः ॥ ४ ॥
आश्वं तथैभं रथिकं च सर्व—ग्रामान् पुराणि क्रमतोऽथ राज्यम् ॥
व्यहारयद्धर्मसुतस्तु सर्वं । धनादि च प्राग्भवकर्मयोगात् ॥ ५ ॥
जयाशया धर्मसुतस्तु यथत् । पण व्यधाद् द्यूतरसे निमग्नः ॥
ततस्तदशा स्फुरदेणतृष्णा—पयोऽनुरूपं बहुतृष्णयार्त्तः ॥ ६ ॥
पणीकृतां द्यूतविवृद्धतृष्णः । स्वां द्रौपदीं सद्दयितां क्षणेन ॥
स हारयामास च सत्यसंघः । श्रीधर्मजो हा कुविधेर्विलासः ॥ ७ ॥
कृत्वा निजायत्तमिदं समग्रं । सुयोधनः श्रीद्रुपदात्मजायाः ॥
दुःशासनं त्वानयनाय सद्यः । स प्राहिणोद् दुष्टतमस्वभावः ॥ ८ ॥
रे द्रौपदि त्वं किल हारितासि । न चाधुनासि प्रमदा तदीया ॥
विडंबिनः पांडुनरेन्द्रपुत्रान् । जहीहि जल्पन् स ययौ गृहांतः ॥ ९ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रुत्वेति तप्तत्रपुसन्निभं त—द्वाक्यं तदार्त्ता द्रुपदात्मजां ताम् ॥
धृत्वा कबर्यां स्वकरात्सभान्त—रानीतवानेष विशेषदुष्टः ॥ १० ॥

सदोनिषण्णेष्वथ भीष्मकर्ण—द्रोणादिषु श्रीविदुरे सती सा ॥
मौढापमानेन च लज्जमाना । जगाविति क्रोधगिरं कठोराम् ॥ ११ ॥

रे रे कुलांगार विमुक्तलज्ज । दुःशासन त्वं किल पापमूर्तं ॥
एवं प्रकुर्वन् वृजिनं च घोरं । भविष्यसि व्यर्थतमात्मवीर्यः ॥ १२ ॥

यथा यथास्याः सुनितंबतोऽसौ । गृह्णाति वासांसि दुराशयः स्राक् ॥
तथा तथा निर्मलशीललक्ष्मी—प्रभावतस्तानि नवान्यभूवन् ॥ १३ ॥

अष्टोत्तरं चीरशतं च तस्या—स्ततः समाकृष्य विषण्ण एषः ॥
निषादतुल्यो निषसाद दुःशा—सनः सदोन्तः कलुषस्वभावः ॥ १४ ॥

दुर्योधनस्योपरि भीमसेन—कोपाग्निरुच्चैर्ज्वलितोऽपि शांतः ॥
श्रीधर्मपुत्रोक्तिजलैस्तथापि । प्राकट्यमासः खलु वाङ्मिषेण ॥ १५ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

संचूर्णयामि द्रुतमेव दुर्यो–धनं सबन्धुं गदयानयाहम् ॥
यद्यन्तरा तीव्ररुषां भरस्य । ममाभवन्नो गुरुवाग्गियं च ॥ १६ ॥
गर्जन्तमेवं बलिनं निशम्य । श्रीभीमसेनं धरणीधवाश्च ॥
अवाङ्मुखाःकेचिद्लं बभूवुः । सुदुःखिताः केऽपि भृशं भयार्त्ताः ॥ १७ ॥
दृष्ट्वा विरूपं घनरोषभीष्मः । श्रीभीष्मभूमानथ तं जगाद ॥
पाप्मन् किमारब्धमरेन्धसूनो । सत्या महत्याः सुविडम्बनं च ॥ १८ ॥
भीमार्जुनाद्या बलिनो भवन्तं । समुद्यता हन्तुममी दुरात्मन् ॥
श्रीधर्मपुत्रेण भृशं निषिद्धाः । सविक्रमोऽयं विनयः सतां हि ॥ १९ ॥
रेरे कुलांगार विमुंच कृष्णां । पतिव्रतां त्वत्कुलकालरात्रिम् ॥
अन्धो बहिस्ते जनकोऽथमन्त—र्बहिश्च रे त्वं किल पापमूर्ते ॥ २० ॥
एवं निशम्य द्रुतमाह भीष्मं । दुर्योधनो द्वादशवत्सरांश्च ॥
अमी भजन्तां वनमेकवर्षं । सुनष्टचर्यां च युधिष्ठिराद्याः ॥ २१ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्रयोदशोऽहं किल वत्सरेऽमून् । ज्ञास्ये स्थितान् क्वापि वने पुरे चेत् ॥
तदापरद्वादशवत्सराणि । संप्रापयिष्येऽहममूंश्च नूनम् ॥ २२ ॥
श्रीधर्मपुत्रोऽपि समग्रभङ्गी—कृत्येदमानम्य गुरूनथाशु ॥
श्रीहस्तिनाख्यं नगरं जगाम । ततः स्वजायानुजसंयुतश्च ॥ २३ ॥
प्रणम्य पित्रोः पुरतः समग्रं । तदैव दुर्योधनजं चरित्रम् ॥
शशंस सद्यः किल धर्मपुत्रः । खेदं मनाग्नो हृदये दधानः ॥ २४ ॥
पांडुस्तदाकर्ण्य मुहूर्तमस्था—न्मौनं समुद्भूतहृदर्त्तिपूरः ॥
सत्यप्रतिज्ञः पुनराह सोऽपि । पूर्णीकरिष्ये द्रुतमेव सन्धाम् ॥ २५ ॥
साम्राज्यनाशेऽपि समग्रराज्ये—ऽप्यरण्यमध्ये नगरस्य मध्ये ॥
स्वोक्तं सदा पालयतां नराणां । समृद्धयः स्युः सकलेऽपि लोके ॥ २६ ॥
धीरोऽसि वीरोऽसि पितस्त्वमेव । धैर्यं ततः क्षत्रकुलार्हमत्र ॥
धृत्वानुमन्यस्व वनाय नश्च निजप्रतिज्ञाकरणैकचित्तान् ॥ २७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सम्प्राप्य तातानुमतिं बलेन । ततः प्रसूं स्वां मृदुवाक्प्रपञ्चैः ॥
प्रसाद्य सद्यः स्वकबन्धुपत्नी—युतोऽचलङ्धर्मसुतो वनाय ॥ २८ ॥
विसृज्य तातं पितृमातरं च । लोकानशेषान् स्वगुणैकरक्तान् ॥
कुन्तासुभद्राद्रुपदात्मजाभिः । सार्धं ययौ धर्मसुतः सबन्धुः ॥ २९ ॥
दुर्योधनाज्ञावशतोऽथ मार्गे । द्राग् क्रूरकर्मारिमहापलादौ ॥
कृष्णामकृष्णां किल भापयन्तौ । विनिर्जितौ श्रीपवनात्मजेन ॥ ३० ॥
श्रीपांडुपुत्रान् विदुरः समेत्यो—पायेषु कामं विदुरोऽखिलेषु ॥
विद्याप्रदानैरनुशास्य सद्य—स्तैः पूजितः स्वं नगरं जगाम ॥ ३१ ॥
श्रीद्रौपदीबन्धुरवेत्य धृष्ट—द्युम्नः समेत्याथ च पांडुपुत्रान् ॥
पाञ्चालदेशाभरणे प्रमोदा—न्निन्ये स्वकांपील्यपुरेऽचिरेण ॥ ३२ ॥
समुद्रविजयाज्ञया सुभटकोटिभिः संश्रितो । हरिर्हरिपराक्रमः प्रणमनाय कुन्त्यांह्रये ॥
अगादिह तदा मुदा सपदि पार्थवियाहृतैः । सविस्मयमभोजयंस्तमशनैरलं पांडवाः ॥ ३३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथो हरिस्तानवदन्मुदाहं । जाने सदम्भान् किल धार्तराष्ट्रान् ॥
दिव्यद्भिरेतैः कपटेन जित्वा । निर्वासिता यूयमहो स्वराज्यात् ॥ ३४ ॥
ततो भवन्तः स्वपदं व्रजन्तु । निहन्मि युष्माकमरातिवर्गम् ॥
दुराशयानां हननादकाले--ऽप्यहो यतो नो नियमस्य भङ्गः ॥ ३५ ॥
ततः सगर्वं हरिणैवमुक्ते । श्रीधर्मपुत्रः पुनराह हृष्टः ॥
संभाव्यते सर्वमिदं मुकुन्द । त्वयि प्रकामं हरिविक्रमे हि ॥ ३६ ॥
त्रयोदशासाद्य समा वनाश्रमं । नूनं हनिष्याम इमानरीनहो ॥
सहायिना श्रीभवताधुना व्रज । युष्मत्प्रसादाच्छुभमेव भावि नः ॥ ३७ ॥
युधिष्ठिरेणेति निगद्य सद्यः । शौरिर्विसृष्टो भगिनीं सपुत्राम् ॥
निजां सुभद्रां स्वरथं वरेण्य—मारोप्य सम्प्राप पुरीं क्रमेण ॥ ३८ ॥
पश्चापि ते मातृकलत्रयुक्ताः । क्रमाद्व्रजन्तो विषयान्तरं च ॥
दुर्योधनस्याथ पुरोधसा द्राग् । तदोचिरे वै कपटांचितेन ॥ ३९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नत्वा भवन्तं निजभूरिभक्त्या । भूमिमिलद्भालकरः सबन्धुः ॥
सुयोधनो मद्वदनेन नीत्या । हे पांडवा विज्ञपयत्यदो वः ॥ ४० ॥

अज्ञानतोऽर्वाग्विहितं मया य—द्विरूपमेतत् किल धर्मसूनोः ॥
ज्येष्ठो गुणैः स्वैर्वयसा स बन्धु–स्ततः समग्रं सहतां ममागः ॥ ४१ ॥

कृत्वानुकम्पां मयि सापराधे । तथानुतापं हृदये दधाने ॥
ततः पुरस्याधिपतित्वमिन्द्र—प्रस्थस्य निष्ठं भज धर्मसूनो ॥ ४२ ॥

एवं हृदि क्षुद्रमतेः सुवाक्ये । सौम्यस्य तस्य क्षितिभृद्वचस्तत् ॥
श्रुत्वा सबन्धुः सरलः किलेन्द्र—प्रस्थं महाप्रङ्गमवाप हृष्टः ॥ ४३ ॥

विज्ञाय दुर्योधनकूटमेत—ल्लेखाक्षरैः श्रीविदुरस्तदैव ॥
कुलावतंसं किल धर्मपुत्रं । विज्ञापयत्याशु हितैकचित्तः ॥ ४४ ॥

वासाय वो निर्मितमस्ति लाक्षा—गृहं नवीनं च सुयोधनेन ॥
तत्र स्थितानेष दुराशयो वः । कृशानुना धक्ष्यति गुप्तमाशु ॥ ४५ ॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

यत्फाल्गुनस्यैष सुयोधनेन । चतुर्दशीकृष्णमहानिशायाम् ॥
महात्मनां श्रीभवतां विनाशं । विधातुमुच्चैः प्रहितोऽहितेन ॥ ४६ ॥

दुर्वारवीर्यः खलु भीमसेनः । श्रुत्वा तदैवं निजगाद सद्यः ॥
सहोदरं ज्येष्ठमतीवकोपा—द्बन्धो क्षमा ते बहुकष्टकर्त्री ॥ ४७ ॥

त्वदाज्ञयाहं समरेऽरिरूपं । दुर्योधनं तं गदया रयेण ॥
एकः कुलोद्भूतकलङ्कपङ्क—मिव द्रुतं हन्मि कृतापराधम् ॥ ४८ ॥

एवं तदीयं घनकोपवह्निं । नयक्षमावाक्यभरामृतेन ॥
श्रीधर्मपुत्रोऽशमयत्क्षणेन । समर्चयन् दुष्टपुरोधसं तम् ॥ ४९ ॥

पुरोधनस्तत्र विशेषमाना—द्दानैरमानैः किल पांडुपुत्रान् ॥
संवासयामास ततः स्वयं स । लाक्षागृहे कृत्रिमभक्तियुक्तः ॥ ५० ॥

इतश्च तस्मिन् दिवसे हि दैवात् । सपश्चपुत्रा जरती च काचित् ॥
निजैकवध्वा सममाययौ द्राक् । संवासिता हृत्कृपया च कुन्त्या ॥ ५१ ॥

P.P. Ac. Gunrathasuri M.S. Jun Gun Aaradhak Trust

तत्रामुचद्गुप्तमथो निशीथे । पुरोधनोऽलं रभसेन वह्निम् ॥
लाक्षागृहे तु ज्वलितेऽनशंस्ते । प्राग्गुण्यपुण्याद्विवराध्वनैव ॥ ५२ ॥
स्थित्वाथ पश्चादिह भीमसेनः । क्षिप्त्वा कृशानौ च पुरोधनं तम् ॥
वेगेन गत्वामिलदात्मनो हि । सहोदरेभ्यः प्रसरत्प्रतापः ॥ ५३ ॥
इतः प्रभातेऽथ जनांस्तु दग्धान् । ससापि तांस्तत्र विलोक्य लोकः ॥
संशोचयामास सुयोधनं तं । निनिन्द कामं पुनरेव पापम् ॥ ५४ ॥
तेषामरीणां किल शङ्कयाथ । महाबलिष्ठा अपि पांडवास्ते ॥
निजोक्तनिर्वाहकृते चलन्ति--स्माहोनिशं त्यक्तसमग्रसौख्याः ॥ ५५ ॥
द्रुमेषु चैत्येऽपि नदीतटेऽपि । वनेऽपि शैलेऽपि पुरान्तरेऽपि ॥
विश्राममेते बलिनोऽपि नीत्या । न क्वापि चक्रुः सुदृढप्रतिज्ञाः ॥ ५६ ॥
इतश्च कुन्ती सुतरां श्रमार्त्ता । श्रांता ह्यशक्ता चलितुं पथीह ॥
जगाद भीमं कियदस्ति वत्स । गन्तव्यमद्यापि किलात्मनां च ॥ ५७ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पन्मात्रमेषा क्रमितुं न शक्ता—स्म्यहं तथेयं द्रुपदात्मजापि ॥
अमू कनिष्ठौ स्वसहोदरौ च । व्रीडावशात्तौ चलतः पुरो हि ॥ ५८ ॥

श्रुत्वेति भार्याजननीद्वयं चा—ध्यारोपयत् स्कन्धयुगेऽथ भीमः ॥
बबन्ध बन्धू च कटीतटे द्रा—ग्दधौ स्वपाण्योरपरौ च बन्धू ॥ ५९ ॥

स सञ्चरेन्नेवमतोऽथ वेगा—न्निःसीमवीर्यः खलु भीमसेनः ॥
निशामतिक्रम्य ततः प्रभाते । किमप्यवापद्वनमप्रमाणम् ६० ॥

निद्रायमाणेष्वखिलेषु तेषु । श्रांतेषु भीमः सुतरां जलार्थी ॥
तत्र भ्रमश्चाप किमप्यमात्रं । महासरः शीतलवारिपूर्णम् ॥ ६१ ॥

स्नानादि कृत्वा क्षणमात्रमत्र । स्थित्वा चलत्यम्बुयुतोऽथ यावत् ॥
पश्चाद्वलक्षीन्यमर्यां च भीमः । काश्चिन्मृगाक्षीं द्रुतमाददर्श ६२ ॥

सा क्रूरदेहा प्रथमं त्वरे रे । त्वं तिष्ठ तिष्ठेति भृशं वदन्ती ॥
भीमं समालोक्य च दिव्यरूपा । बभूव भूयोवरभक्तियुक्ता ॥ ६३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सल्लीलया तत्पुरतः समेत्य । घ्नन्ती च तं नेत्रविकूणितैः स्वैः ॥
गाढं स्खलन्त्या मृदुभाषया सा । जगाद कामं मदनातुराङ्गी ॥ ६४ ॥
रूपश्रिया निर्जितपञ्चबाण । शृणूत्तम त्वं धरणीधरेऽस्मिन् ॥
हिडम्बनामा ह्यमरोऽस्ति तस्य । नाम्ना स्वसा हन्त हिडम्बिकाहम् ॥ ६५ ॥

ततः प्रसादाभिमुखोऽत्र भूत्वा । कामं निमग्नां मदनाब्धिमध्ये ॥
स्वकीयपाणिग्रहयानपात्रा—न्मां जीवितेशोद्धर सद्यस्त्वम् ॥ ६६ ॥

प्रकुर्वतां श्रीभवतां निवास—मस्मिन् वनांतर्हि सहायमेव ॥
शक्त्या करिष्येऽहमतो विवेकिन् । मामुद्वह त्वं करुणां विधाय ॥ ६७ ॥

इत्यालपन्तीं पवनात्मजस्तां । भीमो जगौ सम्प्रति मा वदेदम् ॥
अस्माकमस्मिन् विपिनस्थिताना—मेतद्विलोलाक्षि न युज्यते यत् ॥ ६८ ॥

तयोर्विवादं परितन्वतेद्रीण् । सुभीषणांगो विकरालनेत्रः ॥
अताडयत्तां भगिनीं स्वपाणि—घातैर्हिडम्बः खलु यातुधानः ॥ ६९ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तां ताडयमानामवलोक्य भीमः । प्राह त्वया राक्षस निर्दयेन ॥
बाला त्वियं मत्पुरतस्त्वजित्वा । रणोद्यतं मां खलु ताडयते किम् ॥ ७० ॥
इत्युक्तितो भीषणरूपधारी । प्रोन्मूल्य वृक्षं स तु यातुधानः ॥
प्रत्यस्य क्रोधादथ पिंगनेत्रो । द्रुतं दधावे हननाय तस्य ॥ ७१ ॥
रोषेण भीमोऽपि महामहीरुहं । प्रोन्मूल्य सच्छत्र इवातिभीषणः ॥
सुसिंहनादं च सृजन् सुदारुणं । युद्धाय तस्यानु रयाद्धावत ॥ ७२ ॥
अन्योन्यसंघट्टवशेन पाद—चारान्महांभोनिधिसंयुता हि ॥
सद्यश्चकम्पे धरणी प्रकामं । प्रकीर्णयन्ती धरणीधरांश्च ॥ ७३ ॥
एवं तयो रौद्ररणेऽथ धर्म—सुतादिकान् सत्वरनष्टनिद्रान् ॥
प्रणम्य कुन्तीं च जगौ हिडम्बा । मातः सुतस्ते किल मायतेऽसौ ॥ ७४ ॥
मातः सहायत्वकृते ततोऽस्य । त्वं प्रेषय प्रेषय कञ्चनेषु ॥
जातास्म्यहं निर्मलतद्गुणोघ-क्रीता हिडंबेति हि भीमचेटी ॥ ७५ ॥

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

इतः पलादप्रबलप्रहारो—श्रीमं समालोक्य च जर्जराङ्गम् ॥
अधावत क्रोधवशात्कृपाण—पाणिस्तु धर्मात्मज आक्षिपंस्तम् ॥ ७६ ॥

पुनर्गदापाणिरसौ च सज्जी—भूय क्षुधा श्रीपवनात्मजश्च ॥
आक्रु तं प्रहारेण तथा जघान । प्राणैर्यथामोचि भियेव सोऽपि ॥ ७७ ॥

हते हिडम्बेऽथ हिडम्बिका सा । श्रीभीमरूपेण विमोहिता च ॥
बभूव पृष्ठानुगतिश्च तेषां । सेवापरा साधितदेवतेव ॥ ७८ ॥

अथान्यदा क्वापि वने भ्रमन्ती । तेभ्यो वियुक्ता द्रुपदात्मजा सा ॥
बभ्राम क्षुत्तृड्व्यथिता च यूथ-भ्रष्टा मृगीवातिभयाकुलाङ्गी ॥ ७९ ॥

शार्दूलदन्तावलशूकरादि—जीवा न हि दुष्टतमस्वभावाः ॥
तस्याः स्वशीलेन कृतावनायाः । पराभवं कर्तुमलं भवेयुः ॥ ८० ॥

महावने भूधरकन्दरे च । सरोवरे तेऽपि विलोकयन्तः ॥
पश्चापि ह्येनां सुरवल्लरीव—न्न लेभिरे क्वापि च जातखेदाः ॥ ८१ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततो विषण्णेष्वथ तेषु भीमा--देशं समासाद्य मुदा हिडम्बा ॥
विलोक्य तत्कालमिमां च कृष्णां । तत्रानयच्छक्तिरिव श्रियं च ॥ ८२ ॥

स्वाधीनकुन्तीद्रुपदात्मजा च । वात्सल्यमेष्वेव समुद्वहन्ती ॥
समीहितांभोऽशनवस्त्रदात्री । मार्गेऽचलत्सा पुरतस्त्वमीषाम् ॥ ८३ ॥

भीमेन साकमुदवाहयतां हिडम्बां । कुन्ती युधिष्ठिरनृपावतिहृष्टचित्तौ ॥
चन्द्रेण रात्रिमिव ते सहदेवपार्थ--मुख्या महोत्सवमिहैव वितेनिरेऽलम् ॥ ८४ ॥

सा हृद्यरागाद्विविधानि सौधा--न्याधाय तेषां च वितन्वतीष्टम् ॥
अरंस्त भीमेन समं यथेच्छं । सुभोगभङ्गीभिरनेकरूपा ॥ ८५ ॥

तथा समानीतजलान्नवस्त्र--निश्चिन्तचित्तैः श्रमवर्जितैस्तैः ॥
द्विजन्मनां वेषधरैर्यदेक--चक्राभिधं द्रङ्गमवापि रम्यम् ॥ ८६ ॥

श्रीधर्मपुत्रेण च देवशर्म--द्विजालयान्तर्वसता सतेति ॥
अवादि वात्सल्यकरी प्रकामं । तथा हिडम्बा बहुमानपूर्वम् ॥ ८७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोढव्यमस्माभिरमेयदुःखं । निःकाममाद्वादशवत्सरांश्च ॥
अहर्निशं स्वव्रतपालनाय । ततो वधु त्वं स्वगृहं प्रयाहि ॥ ८८ ॥

श्रीधर्मपुत्रानुमतिं हिडम्बा । संप्राप्य कुन्तां विनिवेद्य गर्भम् ॥
काले स्मृतेर्गोचरमाननीया । ह्येवं वदन्ती च तिरोदधे सा ॥ ८९ ॥

तत्रावसन्तः सुदृशः किलैते—ऽन्यदा समासन्नगृहे समन्तात् ॥
आक्रन्दनं मस्तककुट्टनं च । हाहेति भाषां सुतरामशृण्वन् ॥ ९० ॥

तद्दुःखदुःखी किल भीमसेनः । श्रीदेवशर्माणमथैत्य सद्यः ॥
पप्रच्छ किं शोकसमुद्रमग्नं । कुटुम्बकं ते द्विज दृश्यतेऽदः ॥ ९१ ॥

स्वपाणिना भालमलं स्पृशंश्च । स दैव दैवेति मुहुर्वदंश्च ॥
जगाद भो नूनमभाग्यमेव । निदानमेवं त्वमवेहि विद्वन् ॥ ९२ ॥

दुःखार्त्तमर्त्यामि-दुःखहारि—न्नाकस्मिकामेष विडम्बनां स्वाम् ॥
कथं पुरो वच्मि च निःशरण्य—स्तथापि सद्यः शृणु वत्सल त्वम् ॥ ९३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पूर्वं बकाख्यः खलु राक्षसेन्द्रः । सुसिद्धविद्यो घनभीषणाङ्गः ॥
महाशिलां व्योम्नि विकृत्य संजि—हीर्षुः समागादिह दुष्टचित्तः ॥ ९४ ॥
भीतस्तदा भूमिपतिः सलोकः । स्मरन् जिनेन्द्रं परमेष्ठिमन्त्रम् ॥
गाढं पठन् धर्मपरश्च कायो—त्सर्गं चकाराशु विशुद्धचित्तः ॥ ९५ ॥

तस्य प्रभावान्न जनार्दनेऽलं—भूष्णुः पलादः स जगावितीशम् ॥
हन्तुं जनान् भूप समुद्यतोऽपि । नास्मि ह्यलं ते जिनभक्तितोऽहम् ॥ ९६ ॥
लोकानतो हन्मि न चाव्यवस्थं । परं ममैकं कुरु वांछितं तत् ॥
एकैकमर्त्यं च दिने दिने त्वं । दत्त्वा चिरं तिष्ठ सुखी सलोकः ॥ ९७ ॥
अङ्गीकृतेऽस्मिन्नरनायकेन । संहृत्य सद्यः स शिलां जगाम ॥
कुम्भात्कुमारीपरिकर्षिताख्या—पत्रं नरं चात्ति सदैकमेकम् ॥ ९८ ॥
मन्नामपत्री पुरुषोत्तमाद्य । विनिर्गता प्राग्भवपापयोगात् ॥
नूनं मदाकारणहेतवे धिग् । नरा इमे भूमिपतेः समागुः ॥ ९९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नैमित्तिको भूपतिनाथ पृष्टो । रक्षःक्षयं प्राह स पांडवेभ्यः ॥
अद्यापि ते नात्र समागता भोः । किं त्वागतः शीघ्रतरं क्षयो मे ॥ १०० ॥
एवं तदीयं वचनं निशम्य । भीमस्तमालोक्य भयातुरं च ॥
तद्दुःखदुःखादतिपीडितः सन् । दध्यौ हृदन्तः करुणैकचित्तः ॥ १०१ ॥
धिग् धिग् शरीरं मम पौरुषं धिग् । भवेन्न येनापरजीवरक्षा ॥
चित्ते विचिन्त्येति तमाह भीम—स्त्वं तिष्ठ रे यामि पदे त्वदीये ॥ १०२ ॥
ततस्त्वहृष्टो निजगाद विप्रो । नूनं तवैतत्खलु युज्यते तत् ॥
परोपकारैकरताः पुमांसो । देहादिसर्वं सुतरां तृणन्ति ॥ १०३ ॥
प्राघूर्णकोऽसीह परं मम त्वं । स्थाने ततो मे मरणं न युक्तम् ॥
तवोपकारित्विथ तेन तिष्ठ । गच्छाम्यहं कर्मवशानुगश्च ॥ १०४ ॥
इत्युच्चरन्तं द्विजमेनमुच्चैः । संस्थाप्य भीमः स्वगृहे बलेन ॥
जगाम रक्षोभुवनं नरेन्द्र—नरैः समं विश्वजनोपकारी ॥ १०५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रक्षःसमूहेन समं समेत्य । स यातुधानस्तमवेक्ष्य च द्राक् ॥
संपुष्टदेहं च मनोहरं च । हृज्जातहर्षादवदत्स्वभृत्यान् ॥ १०६ ॥
मद्भाग्यतोऽयं च महाशरीरः । समागमत्कोऽपि सपूरुषोऽद्य ॥
बुभुक्षितानामयमेक एवा—स्माकं च तृप्तिं जनयिष्यति द्राक् ॥ १०७ ॥
एवं निगद्य क्रकचाकृतीन् स्वान् । निपेषयन् द्राग्दशनान्मुहुश्च ॥
विलोलयन्नाननपङ्कजे च । लोलां क्षुधा भ्रान्ततराक्षयुग्मः ॥ १०८ ॥
प्रलोभयन्नन्यपलादवारं । तद्दर्शने कृत्तिकयातिभीष्मः ॥
नानाट्टहासान् विपुलांश्च कुर्वन् । यावत्समभ्येति पुरः पलादः ॥ १०९ ॥ युग्मम् ॥
विमुच्य तावत्स्वपटीं पटूष्मा । भीमोऽतिभीमाकृतिरेव सद्यः ॥
कोपादुदस्थाच्छयनाद्धराभृत्—समः करे लोहगदां दधानः ॥ ११० ॥
जनार्दनोद्भूतमघं पलाद । तवोदितं रे स्मर दैवतं स्वम् ॥
नूनं कथाशेषमहं करिष्ये । भवन्तमद्येति तमाक्षिपत्सः ॥ १११ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्याक्षेपात् त्रस्तधैर्यः पलादः । सोऽपि क्रोधेनोद्दधावे स्वदण्डम् ॥
ऊर्ध्वीकृत्यान्यैः पलादैः समस्तै—र्दुर्जेयं तं भीमसेनं निहन्तुम् ॥ ११२ ॥

श्रीभीमरक्षःपदघाततो यत् । क्षोभोऽभवद्भूवलये समन्तात् ॥
तेनोदधेरुच्छलितानि यन्त्रो—न्मुक्तानि किं सर्वजलानि जाने ॥ ११३ ॥

जितश्रमोऽसौ समरेऽथ भीम—स्तं योधयन्नेवमलं बलेन ॥
गदाप्रहारेण शिरस्तदीयं । पुस्फोट मृत्कुम्भमिवातिकोपात् ॥ ११४ ॥

तेनापि घातेन महाशरीरः । पतन् पलादाधिपतिः समन्तात् ॥
स कम्पयामास महीमशेषां । निपातयन्नप्यवनीरुहश्च ॥ ११५ ॥

पपात तन्मूर्ध्नि सुपुष्पवृष्टि—र्व्योम्नस्ततोऽभूत्सुरवो जयेति ॥
श्रुत्वा सलोकः किल तत्पुरीराट् । वर्धापयामास मुदाथ भीमम् ॥ ११६ ॥

तत्पौरुषाद् ज्ञानिगिरापि मत्वा । तान् पांडवान् द्राक्प्रकटान् विधाय ॥
नानोत्सवैः सर्वपुरीसमक्षं । भूमीपतिर्भक्तियुतोऽर्चयच्च ॥ ११७ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्मिन्नरिष्टे सुतरां गरिष्टे । श्रीभीमतेजःप्रकराद्विनष्टे ॥
सर्वेषु चैत्येषु जना जिनार्चाः । समर्चयन्तिस्म हृदः प्रमोदात् ॥ ११८ ॥

शत्रोर्भिया पांडुसुता निशायां । ततः पुरं तद्बकसेन मुक्त्वा ॥
कृतोटजा द्वैतवनं तथाप्य । तस्थुः सुगुप्ताः सुदृढप्रतिज्ञाः ॥ ११९ ॥

तत्रागतान् पांडुसुतानितश्च । ज्ञात्वाथ रक्षोहननं निशम्य ॥
अन्तर्विषादो बहिरेव हर्षं । ततान दुर्योधनराडपि द्राग् ॥ १२० ॥

सुयोधनस्याशु च पांडुपुत्र—विनाशभावं विदुरो विदित्वा ॥
प्रियंवदं नाम चरं प्रवीणं । स प्राहिणोत् पांडुसुतान्प्रति द्राग् ॥ १२१ ॥

सम्प्राप स द्वैतवनं चरेन्द्रो । नत्वाथ तान् पांडुसुतानिति द्राग् ॥
तद्वाचिकं श्रीविदुरस्य सम्य—ग्जगौ चिरं क्षेमकरं समग्रम् ॥ १२२ ॥

द्वैताख्यकांतारकृतोटजान् वो । विज्ञाय दुर्योधनभूमिपालः ॥
कर्णेन साकं च समेष्यतीह । स्थेयं भवद्भिस्तदलं सचित्तैः ॥ १२३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूयो निशम्येत्यथ याज्ञसेनी । जगौ समुत्पन्नघनप्रकोपा ॥
अद्यापि किं किं खलु पापिनस्ते । कर्त्तार एवात्यशुभं नवं नः ॥ १२४ ॥

सत्योक्तितः प्रौढतरं च राज्यं । त्यक्तं स्वद्रङ्गं धनसैन्ययुक्तम् ॥
अद्याप्यपूर्णं किमु तच्च कर्त्ता—रोऽस्मासु तेषां पुनरागतिर्यत् ॥ २२५ ॥

धिग्मां हि यद्यूयमिमे वृताश्च । पञ्चापि पांडोस्तनया नयज्ञाः ॥
क्षात्रं च धिग्धिग्भवतां च वीर्यं । धिग्धिग्भवच्छत्रपरिग्रहं च ॥ १२६ ॥

असूयत क्लीबनरांस्तनूजान् । वीरप्रियाप्यम्ब कथं च कुन्ती ॥
यद्धार्त्तराष्ट्रैरधमैस्तदा मे । विडम्बनाकार्यधमोचिता हि ॥ १२७ ॥

सोढं तदप्येभिरलं विमुक्त—लज्जैर्विमुच्याधिपतामरण्यम् ॥
श्रितास्तदद्यापि च धार्त्तराष्ट्रा । वैरादहो नो विरमन्ति हाहा ॥ १२८ ॥

श्रुत्वेति कान्तामुखतः करेणा—स्फाल्यावनीं शीघ्रमसावुदस्थात् ॥
श्रीभीमसेनः खलु कोपकम्प्रः । सन्मूर्तिमान् वीररसः किमेषः ॥ १२९ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गर्जंश्च पर्जन्य इवेन्द्रसूनु—र्विवर्धयन्नेष कषायवह्निम् ॥
क्षुब्धोद्धताष्टापदकेसरीभं । टंकारमुच्चैर्धनुषश्चकार ॥ १३० ॥

किं मूर्तिमन्तौ प्रतिबिम्बरूपौ । तयोस्ततो लोहितलोचनास्यौ ॥
माद्रीसुतौ द्वावपि वैरिकालौ । प्रोल्लालितासी सुतरामभूताम् ॥ १३१ ॥

तान् बांधवान् वैरिगजेन्द्रपञ्चा—ननानलं क्षुब्धतरान्निरीक्ष्य ॥
ज्येष्ठोऽवदद्धो विरमन्तु वीरा । विपक्षहृद्वेध्मि हि दोर्बलं वः ॥ १३२ ॥

भवद्भिरुध्यत्समरोद्यतैर्मा । मद्वागसत्यास्त्विवति भो विनीताः ॥
ततः प्रतीक्षध्वमनेहसं च । कियन्तमात्मावसरावधिं च ॥ १३३ ॥

ज्येष्ठाज्ञयैवं पवनात्मजाद्याः । सहप्रसूतां प्रकृतिं च जग्मुः ॥
युधिष्ठिरः श्राग्विदुरोक्तमन्तः । स्मरंश्चरं तु विससर्ज सद्यः ॥ १३४ ॥

त्यक्त्वाऽथ देशं तमथो महीधरं जग्मुः किलैते वरगन्धमादनम् ॥
तत्राप्यपश्यन् पुरतो धराधरं । तथेन्द्रकीलाभिधमद्भुतश्रियम् ॥ १३५ ॥

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

विज्ञाय पार्थः समयं ततश्चा—नुज्ञाप्य धर्मांगजमार्यवर्यम् ॥
विद्या मुदा साधयितुं जगाम । तत्राशु कृत्वा मनसः समाधिम् ॥ १३६ ॥
नत्वात्र नाभेयजिनं स्थिरोऽभूत् । संसाधितुं श्रीमणिचूडमुख्यैः ॥
दत्ताः स्वविद्याः कमलासनोऽसौ । ध्यानाधिरूढस्तु रसालवच्च ॥ १३७ ॥
भूतादयः सिंहगजेन्द्रमुख्या—स्तं नाशकंश्चालयितुं सचित्तम् ॥
ततः प्रसन्नाः समयेऽथ विद्या—देव्यो बभूव प्रकटास्तदग्रे ॥ १३८ ॥
तुष्टा वयं वत्स वरं वृणुष्वे—त्येता जगुस्तं स्थिरमानसं द्राग् ॥
ध्यानादथोत्थाय महेन्द्रसूनु—स्तासामकार्षीत् प्रणतिं स्वभक्त्या ॥ १३९ ॥
सश्चक्रमुस्ताश्च शरीरमस्य । संसिद्धविद्यस्तदिलाधरेन्द्रे ॥
दृष्टोऽथ पार्थः किल हन्यमानम् । व्याधेन तं शूकरमाददर्श ॥ १४० ॥
अथावदत्तं दययेति पार्थो । मामेति कामं प्रलपन् मुहुश्च ॥
अहो सुतीर्थेऽत्र मदीयदृष्टौ । निहंसि किं पोत्रिणमुद्धतस्त्वम् ॥ १४१ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुलं वरं चामितविज्ञता ते वृथैव मे भाति दयोज्झितस्य ॥
अमुं च तीर्थे त्वमहो निहंसि । येनापराधेन विवर्जितं च ॥ १४२ ॥

सन्तर्जितोऽप्येवमुवाच पार्थं । व्याधः कथं पांथ मुधा वनेऽत्र ॥
निषेधयस्याशु निजेच्छयैव । मां सञ्चरन्तं घनवीर्यवर्यम् ॥ १४३ ॥

न कोऽप्यमीषां वनवासिनां च । त्राता मयि क्रोधवशात्प्रवृत्ते ॥
नूनं निजक्षात्रबलेन यत्त्वं । संरक्षितामुं किल रक्ष रक्ष ॥ १४४ ॥

कोदण्डमुद्दण्डमथार्जुनोऽपि । धृत्वा कराब्जे यमदण्डवच्च ॥
कोपेन कांडैर्गगनं समग्र—मपूरयद् दूरितवैरिवर्गः ॥ १४५ ॥

व्याधोऽपि योध्धुं समधत्त तूर्णं । शरासनं स्वीयकरांबुजे द्राक् ॥
स्वलाघवाद्बाणगणान् विपत्रान् । कुर्वन्नशेषान् फलदान् पुरस्तात् ॥ १४६ ॥

तयोर्निरस्तार्ककरेण स्वे च । विसर्पिणा मार्गणमण्डलेन ॥
घनांधकारैः स्फुरितं समन्ता—द्यथा कुराज्यं कुनयैरमेयैः ॥ १४७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अपाहरत्पार्थधनुः स माया—व्याधस्ततः सोऽपि निगृह्य खड्गम् ॥
क्रोधादधावेऽथ निहन्तुमेनं । तदप्यनेनापहृतं क्षणेन ॥ १४८ ॥
तमाह्वयद् द्वन्द्वरणं विधातुं । क्ष्वेडानिनादैर्भयकृत्स पार्थः ॥
मिथोंगमङ्गेन निपीडयन्ता—वुभावभूतां तदलं बलिष्ठौ ॥ १४९ ॥

धृत्वा रणे तं चरणे च पार्थ—स्तथा बलेनाभ्रमयत्पटीवत् ॥
ततः पतत्कौसुमवृष्टितोऽनु । ददर्श कश्चित्पुरतो नरं सः ॥ १५० ॥

किमेतदित्यद्भुतसङ्कुलं तं । पार्थं जगौ सोऽपि पुमांश्च हृष्टः ॥
तुष्टोऽस्मि ते सत्वगुणेन पार्थ । त्वं प्रार्थयेष्टं स ततोऽप्यवोचत् ॥ १५१ ॥
त्वां प्रार्थयिष्ये समये वरं च । नूनं मनोऽभीष्टमनिष्टनाशि ॥
कोऽसि त्वमाख्यं खलु ते किमस्ति । वृत्तांतमेनं सकलं वद त्वम् ॥ १५२ ॥
श्रुत्वेति हृष्टः स जगौ शृणु त्वं । वैताढ्यशैले रथनूपुराख्ये ॥
पुरेऽस्ति विद्याधरराट् किलेन्द्र—नामा सदा दिक्पतिसेव्यमानः ॥ १५३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्यानुजो लोलमनाश्च विद्यु—न्मालीति लोकव्रजशोककारी ॥
निर्वासितः स्वीयपुराद्धि राज्ञा । रक्षः पुरेऽगाद् द्रुतमेव कोपात् ॥ १५४ ॥

तत्सङ्गतास्ते तलतालकाद्या । रक्षोगणास्तत्र महेन्द्रदेशे ॥
संक्लेशमुच्चैरसृजन्नकस्मा—दापाततो लुंटनबन्धदक्षाः ॥ १५५ ॥

त्वां केवलज्ञानिगिरात्र मत्वा । त्वदागमाय प्रजिघाय मां सः ॥
त्वदन्तिकं तत्कवचं किरीटं । धनुर्गृहाणाश्रय मद्रथं च ॥ १५६ ॥

पार्थः किरीटी कवची निषंगी । धन्वी रथी चामितवीर्यशाली ॥
प्राप्तस्ततो राक्षसपत्तने द्रा—क्पुण्याधिकानां किमगम्यमस्ति ॥ १५७ ॥

महारणं घोरतरं विधाय । धनंजयस्तांश्च निहत्य तत्र ॥
वैताढ्यमासाद्य तथेन्द्रपादान् । मुदानमत् प्राप्तजयातिदीप्तः ॥ १५८ ॥

ततः समभ्येत्य सुरेन्द्रसूनु—रस्थापि चेन्द्रेण निजासनार्धे ॥
तल्लोकपाला निखिला अपीमं । नेमुस्तदाज्ञावशतो जयाढ्यम् ॥ १५९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निजांगजायेव ददौ स दिव्या—युधानि पार्थाय ततोऽतितुष्टः ॥
धनुःकलामिन्द्रसुतोऽपि चित्रां—गदाय सत्प्रीतिविवृद्धयेऽदात् ॥ १६० ॥
सम्प्राप्य शक्रानुमतिं किरीटी । प्रोत्कण्ठितः स्वाम्बसहोदरेषु ॥
स व्याप्नुवद्व्योम ततो विमानैः । पुनर्निजस्थानमवाप सद्यः ॥ १६१ ॥
ज्येष्ठौ च बन्धू प्रणनाम कुन्ती—मालाप्य तौ स्नेहगिरा लघू च ॥
सुदृष्टिदानैर्द्रुपदात्मजां च । प्राज्यैस्तदा प्रीणयतिस्म पार्थः ॥ १६२ ॥
निगद्य चित्रांगदखेचरोऽपि । तेषां पुरः पार्थपराक्रमं तम् ॥
तन्निर्विसृष्टः खलु शक्रदृष्टौ । पीयूषवृष्टिप्रतिमोऽभवच्च ॥ १६३ ॥
तेषामितोऽमन्दमुदां च मध्या—द्व्योम्नोऽपतत्काञ्चनपङ्कजं च ॥
ततस्तदादाय करेण कृष्णा । सद्यः समाघ्राय च भीममाह ॥ १६४ ॥
प्रियाणि पद्मानि ममेदृशानि । समर्पय प्रेमभरेण तानि ॥
आनीय सद्यः सरितो गरीयः—सरोवराद्वा ह्रदतोऽपि कस्मात् ॥ १६५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भीमोऽपि पद्मानि वनांतराच्चा--न्वेष्टुं स्मरन् पञ्चनमस्कृतिं च ॥
गतस्ततो धर्मसुतस्य वामं । पुस्फोर नेत्रं घनविघ्नदायि ॥ १६६ ॥
अरिष्टमेतन्मनसातिमत्वा । जगौ स्वबन्धून् किल धर्मपुत्रः ॥
न कोऽपि सोऽस्तीह च भीमबन्धोः । पराभवं कर्तुमलं भवेद्यः ॥ १६७ ॥
संसूचयत्येव मदक्षि भीमे । विघ्नं परं भूरितरं च घोरम् ॥
यूयं तदुत्तिष्ठत तस्य पृष्ठे । शस्त्रैर्युता गच्छत सावधानाः ॥ १६८ ॥
आलोकयन्तः खलु सर्वतस्ते । गतास्तरूणां गहनप्रदेशे ॥
ऐक्षन्त न क्वापि च भीममेनं । भाग्येन हीना धनसेवधिं व ॥ १६९ ॥
मोहेन मूर्छावशतः पतन्त--स्ते द्राग् हिडम्बोक्तमथ स्मरन्ति ॥
नामस्मृतेरेव समागता सा । तानाह कार्यं च किमस्ति पूज्याः ॥ १७० ॥
भीमस्वरूपे कथिते हिडम्बा--प्यारोप्य तान् मूर्धनि भीमपार्श्वे ॥
नीत्वा ततः क्षिप्रमथ प्रमोदा--कुला गता सा हितकार्यकर्त्री ॥ १७१ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

भीमस्तु तत्पद्मसरोवरस्य । सेतुस्थितो मार्गसुदुर्गतिं स्वाम् ॥
सहोदरेभ्यः प्रणिगद्य सद्यः । कामं सदानन्दकरो बभूव ॥ १७२ ॥
सौवर्णपद्मैर्द्रुपदात्मजेच्छा--पूर्त्यै ततः श्रीपवनात्मजोऽयम् ॥
सरोवरं गाहति यावदेत--दहश्यतां तावदगात्क्षणेन ॥ १७३ ॥
पार्थोऽपि तत्पृष्ठगतोऽप्यदृश्य--स्ततोऽभवत्सत्वरमेव तत्र ॥
सर्वाङ्गिनिप्राणभृतां यदेक--स्मिन्मीलिते मीलति नूनमन्यत् ॥ १७४ ॥
युधिष्ठिरो भ्रात्रनुगो बभूव । महोदभूतां यमलावपि द्राग् ॥
ततो भयार्त्ते विपिनेऽथ कृष्णा--कुन्त्यावभूतां किल तानदृष्ट्वा ॥ १७५ ॥
सत्यावुभे ते रभसेन कायो--त्सर्गस्थिते चक्रतुरेकचित्ते ॥
स्वशांतिहेतोः परमेष्ठिमन्त्र--ध्यानं ततो विघ्नविनाशदक्षम् ॥ १७६ ॥
ध्यानस्थयोर्निश्चलचेतसोस्तयो--रत्यक्रमद्धि प्रहराष्टकं ततः ॥
व्योम्नः समुत्तीर्य दिने द्वितीयके । नेमुर्निजांबां किल पांडवाः प्रगे ॥ १७७ ॥


P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

उत्सर्गमुत्सृज्य निजांस्तनूजान् । समागतान् वीक्ष्य मुदाथ कुन्ती ॥
पृष्ठा च तेषां कुशलां सुयात्रां । समागतामन्दमुदं च तूर्णम् ॥ १७८ ॥

सुखं स्थितां तत्र सपांडवां च । कुन्तीं पणम्याथ नरश्च कश्चित् ॥
तैस्तैस्तदीयैश्चरितैः समस्तै–र्विस्मापयंस्तां सुतरामुवाच ॥ १७९ ॥

मातः शृणु त्वं खलु गच्छतो हरे–र्निर्मातुमुच्चैर्मुनिकेवलोत्सवम् ॥
सद्यो विमानं स्खलितं भवत्यो–रूर्ध्वं समागच्छदहो सुशीलम् ॥ १८० ॥

तत्कारणं ज्ञातुमथाहमत्र । बिडौजसा द्राक्प्रहिताभिधानः ॥
सम्प्रेषितः प्रेष्यतया भवत्योः । सत्योर्निरीक्ष्यागममिंद्रपार्श्वम् ॥ १८१ ॥

विज्ञाय सत्योः परमेष्ठिमन्त्र–ध्यानक्रियां दुस्सहविघ्नहर्त्रीम् ॥
हेतुं विमानस्खलने सुरेन्द्रः । स्वमानसे चिन्तयतिस्म चाशु ॥ १८२ ॥

मामित्यवादीदथ याज्ञसेनी–वाक्यादमी पांडुसुताश्च पञ्च ॥
स्नातुं सुपद्मान्यविशन् सरोन्तः । स्फुरन्महाव्यालभरैर्विशाले ॥ १८३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रीशंखचूडः सरसोऽस्य भोगि—पाशैरधीशः सुदृढं निबद्धश्च ॥
अमूननैषीद्भवनं स्वकीयं । धिग्धिग्न केनापि पुनर्न्यषेधि ॥ १८४ ॥
सत्योरियं श्रीपरमेष्ठिमन्त्र—स्मृतिस्तयोः सुन्दर तन्निमित्ता ॥
अस्मिन् विमानस्खलने किलैत—ज्ज्ञानोहि तत्त्वेन च कारणं भोः ॥ १८५ ॥
गत्वा ततस्त्वं किल शंखचूडा—त्तान् मोचयित्वा मम शासनेन ॥
आनीय सत्योः सविधिं विधिज्ञ । ध्यानं द्रुतं मोचय मोचयाथ ॥१८६॥
पाताललोकं तदहं च गत्वा । निरागसः पांडुसुतान् किमेतान् ॥
निरायुधान् बन्धितवानहीश । तमाक्षिपं चेति भृशं वचोभिः ॥ १८७ ॥
मदीयकासारसरोजवांछा—करानथा बन्धिषमित्यमूंश्च ॥
उदीरिते तेन पुरन्दराज्ञा—मस्मै तदा शंसितवानहं च ॥ १८८ ॥
पुरन्दरादेशमवाप्य राज्ये । न्यवेशयत्तान् किल शंखचूडः ॥
यतः सुराधीश्वरशासनं हि । मान्यं सदा मर्त्यसुरासुराणाम् ॥ १८९ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सुनिस्पृहै राज्यसुखेष्वमीभि—स्त्वदीयपादांबुजषट्पदाभैः ॥
पार्थस्य सान्निध्यकरः फणीन्द्र—श्चक्रे रणेऽस्यावसरेऽथ हृष्टः ॥ १९० ॥

अङ्गीकृत्य वचस्तदद्भुततरं हारं प्रदायाहिपः । पार्थीयांगदमौलिकुण्डलमहाविद्याश्चतुर्भ्यस्तथा ॥
सर्वांस्ते च सुतानथो नयरतान् साकं मया प्रैषयत् । तन्मामिन्द्रविमानयानकृतये त्वं प्रेषयद्रागतः ॥१९१॥

तत्तादृक्तनयागतिप्रमुदिता कुन्ती वधूटीयुता । देवं त्वं विससर्ज वर्यवचनैरानन्दकृद्भिर्भृशम् ॥
पस्पर्श स्वकपाणिपद्मवलयैश्चांगं सुतानां मुदा । तेऽप्युच्चैर्विनयेन मातृचरणौ भक्त्या प्रणेमुस्तदा॥१९२॥

इति तपागच्छाधिराजश्रीसोमसुंदरसूरिसन्ताने सकलवाचनाचार्यचक्रमण्डलीशिरोमणिपंडित-
श्रीसाधुविजयगणिशिष्यपरमाणुपण्डितश्रीशुभवर्धनगणिभिःप्रणीते श्री-
पांडवचरित्रे महाकाव्ये पांडवद्यूतक्रीडावनवासादिवर्णनो नाम
॥ चतुर्थः सर्गः समाप्तः ॥ श्रीरस्तु ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

## ॥ अथ पञ्चमः सर्गः प्रारभ्यते ॥

स्वभक्तिभाजामखिलान्तराय—हरं सदा सौख्यकरं च लोके ॥
वन्दे मुदा श्रीअजितं जिनेन्द्रं । महोदयश्रीकरणप्रवीणम् ॥ १ ॥
ते पांडवाः षट् विषमाः समाश्चा–तिक्रम्य सद्विक्रमविश्रुताख्याः ॥
पुनर्ययुर्द्वैतवनं नयश्री—विराजिताः सौख्यनिवासहेतोः ॥ २ ॥
तत्रागतान् पांडुसुतानितश्च । विदंश्चरेभ्यः स हि धार्त्तराष्ट्रः ॥
समेत्य वेगेन बलं समस्तं । न्यवेशयद् द्वैतसरस्तटे च ॥ ३ ॥
तत्रैत्य चित्रांगदखेचरेणा—नुगम्यमानोऽनुचरैर्नरेन्द्रः ॥
निषिध्यमानोऽपि सुयोधनाख्यो—ऽवागाहतोच्चैः सहसा सरस्तत् ॥ ४ ॥
स खेचरः कोपवशात्ततस्तं । दुर्योधनं सानुजमाजहार ॥
तदङ्गना धर्मसुतं समेत्य जगू रुदन्त्यो द्रुतमेवमुच्चैः ॥ ५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

युष्मासु चेज्ज्येष्ठ किलापराद्धं । मुग्धैर्भृशं श्रीधृतराष्ट्रपुत्रैः ॥
कृपां कुरु त्वं ह्यनुजेषु धर्म—समुद्भवत्वाच्च विवृद्धभावात् ॥ ६ ॥
तद्वाक्यमाकर्ण्य दयार्द्रचेता । विमुक्तकोपः किल धर्मसूनुः ॥
ततः समर्थं रणकर्मणि श्री—पार्थं समादिक्षदिहैव कार्ये ॥ ७ ॥
गत्वेन्द्रसूनुः किल खेचरेन्द्रं । तमाह्वयं प्रार्थितवान् क्षणेन ॥
न्यावर्त्तत क्रोधवशेन सोऽप्या—रक्तेक्षणस्तत्क्षणमात्मखेटैः ॥ ८ ॥
प्रवर्षतो लोहशरैरमन्दं । गुणान्वितैरेव च गर्जतः श्राग् ॥
धाराधरस्येव धनंजयस्या—शुष्यन्महावैरिजवासकद्रुः ॥ ९ ॥
तदा विहस्तोऽस्तबलः स शत्रु—र्व्रजंस्तु दासत्वमशक्तिभावात् ॥
ननाम पार्थं सहसैत्य दुर्यो—धनं मुमोचाशु सहानुजैश्च ॥ १० ॥
अथावदत्खेचरमेष वाणीं । वणीकृतां निर्मलनीतिभिः श्राग् ॥
धनञ्जयोऽहं गुरुबन्धुवाचा—ऽकार्ये निबद्धः समरं सखे द्राग् ॥ ११ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

अभ्येत्य बन्धोः ससुयोधनस्त्वं । नमस्व तं श्रीगुरुवत्स्वकीयम् ॥
निरागसं मित्रमिवाथ सेव्यं । संधिं कुरु प्रीतिविवृद्धयेऽस्य ॥ १२ ॥
इत्युक्तमात्रः स विमानसंस्थ—स्तुष्टाशयः प्रौढतमोत्सवेन ॥
अग्रेसरं पार्थमथो विधाय । श्रीधर्मपुत्रांतिकमाजगाम ॥ १३ ॥
युधिष्ठिरं सानुजमत्र दृष्ट्वा । शिरोऽर्त्तिशल्यव्यथितांगभृद्वत् ॥
दुर्योधनः कीलितवज्रनामा—ननस्फुरत्कोपभरः प्रकामम् ॥ १४ ॥
चित्रांगदेन प्रणतांह्रियुग्मः । सुयोधनं तं किल धर्मसूनुः ॥
मुहुर्मुहुः स्नेहललोचनाभ्या—मपश्यदेतद्धि सतां चरित्रम् ॥ १५ ॥
यस्ते गुरुस्ते ह्यपराधसोढा । यश्चास्ति ते जीवितदानदक्षः ॥
नमस्य रे मूढ न तं किलेति । तेऽनामयंस्तं च बलेन तस्य ॥ १६ ॥
नमन्तमालिंग्य युधिष्ठिरस्तं । पप्रच्छ कामं कुशलं निजानाम् ॥
प्रीत्या ततः सोऽपि च धर्मपुत्र । प्रोवाच सद्यः स्वकचित्तसंस्थम् ॥ १७ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वराज्यनाशः खलु वैरिपीडा । व्रीडाकृते मे न तथा बभूव ॥
यथा प्रणामस्त्वयि बाधते मां । सुदुस्सहोऽयं हृदि धर्मपुत्र ॥ १८ ॥

एवं समाकर्ण्य निरस्तकोपः । कामं तमाश्वास्य युधिष्ठिरः प्राक् ॥
प्रैषीन्निजं द्रङ्गमतो हि सन्तो । हितैषिणः स्वहितचिन्तकेषु ॥ १९ ॥

गङ्गासुतद्रोणमुखास्तमाहु—र्दुष्ट त्वया पार्थबलस्य लेशः ॥
ज्ञातो हि तं मूढ विचार्य चित्ते । सन्धेहि सद्यः सह तैर्महद्भिः ॥ २० ॥

इत्यादि तेषां हितमुक्तमुच्चै—रजीगणन्नेष सुयोधनश्च ॥
त्रिदोषजो व्याधिरिवौषधानि । नानाविधान्यायतदौष्ट्यभावः ॥ २१ ॥

व्रजन्नितस्तत्र जयद्रथो दुः—शल्यापतिः स्वीयसुतापतित्वात् ॥
निमन्त्रितः स्नेहवशेन कुन्त्या । तस्थौ तदाध्वन्यपि हृष्टचित्तः ॥ २२ ॥

स्वदिव्यशक्त्या त्रिदशेशसूनु—रानीय भोज्यान्यमृतोपमानि ॥
अभोजयत्तं प्रथमं फलं य—त्सद्भोजनं प्रीतिभरस्य नूनम् ॥ २३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पद्माननां श्रीद्रुपदात्मजां तां । सम्पश्यतस्तस्य मनोमरालः ॥
तदीयलावण्यसरोवरांत—र्भूकूभृशं खेलितुमुत्सुको द्राग् ॥ २४ ॥
किञ्चिच्छलं सोऽपि विलोक्य पांडु—पुत्रानिमानत्र च वञ्चयित्वा ॥
रथे समारोप्य च याज्ञसेनीं । द्रुतं ययौ मूर्त्तिमतीं श्रियं किम् ॥ २५ ॥
प्रधावमानौ तमनु प्रकोपा—द्भीमार्जुनावेवमथाह कुन्ती ॥
नूनं भवद्भ्यां भगिनीपतित्वा—न्महापराध्येष न मारणीयः ॥ २६ ॥
धनञ्जयोऽप्यत्र नरेश्वरस्य । सेनां समग्रामपि बाणवारैः ॥
प्रकाममुन्मार्गगतिं चकार । शरासनत्कृतिनादघोरैः ॥ २७ ॥
गदाप्रहारैः पवनात्मजोऽपि । शालिव्रजालिं मुद्गलैरिव द्राक् ॥
अपीडयद्दन्तिघटां च तस्यो—च्छलन्महाशोणितसङ्कुलां हि ॥ २८ ॥
ततोऽर्धचन्द्राशुगसञ्चयेन । तत्केतुकूर्चोर्ध्वकचादि सद्यः ॥
पार्थोऽथ चिच्छेद च मातृवाक्या—त्तज्जीवितव्यं न जहार शक्तः ॥ २९ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रत्यानयामासतुराशु कृष्णां । ततः समारोप्य रथे भटौ तौ ॥
प्रणेमतुर्मातृपदारविन्दे । तत्तादृशात्युग्रबलौ प्रमोदात् ॥ ३० ॥
रणाश्रमस्वेदकदम्बकेन । सुपिच्छलांगौ किल भीमपार्थौ ॥
तौ प्रोच्छलत्प्रेमभरेण कुन्ती । मुदास्पृशत्पाणिपयोरुहाभ्याम् ॥ ३१ ॥
तेषां महत्तोषभृतामितश्च । श्रीनारदर्षिस्तु दिवोऽवतीर्य ॥
मुदा तदन्तर्निषसाद कामं । तदर्थितस्तादृशभक्तियोगात् ॥ ३२ ॥
नीत्वाथ तान्नारदतापसर्षी—रहःप्रदेशे हितमाह चेति ॥
दुर्योधनस्याभिमतं समग्रं । स्वस्थात्मचित्ताः शृणुताद्य यूयम् ॥ ३३ ॥
दुर्योधनः क्लिष्टमतिस्तु युष्मा—द्विमोचितः प्राप पुरीं तदाब्धि ॥
कृतप्रयत्नो भवतां विनाशे । समस्ति पापाद्विफलप्रयासः ॥ ३४ ॥
हन्तुं यदासौ स्वयमप्रभुर्वो । नानाप्रकारैः कपटैः प्रकामम् ॥
उद्घोषणामेष तदा पुरान्त—रचीकरत्सर्वत एवमुच्चैः ॥ ३५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यः कोऽपि मायावशतोऽथ बाहु—बलेन नूनं पुरुषोत्तमश्च ॥
निहन्ति पांडोस्तनयानिमान् स्व—राज्यार्धमस्मै वितरामि सम्यग् ॥ ३६ ॥
एवं निशम्यात्मपितुर्विनाश—वैरेण विप्रेशपुरोहितस्य ॥
व्यजिज्ञपद् भूपतिमङ्गजश्च । कोऽत्र प्रयासो भवतां नरेन्द्र ॥ ३७ ॥
कृत्याभिधा मे वरदास्ति विद्या । समस्तकृत्यप्रथने समर्था ॥
तस्याः प्रभावात् त्रिजगज्जनौघं । क्षोभं नये किं किल पांडवास्तान् ॥ ३८ ॥
हृष्टस्ततः पापमतिः स दुष्टः । समुद्यतं स्वेष्टकृतौ द्विजं तम् ॥
सुवस्त्रदिव्याभरणावलीभि—रानर्च्य हर्षात्प्रशशंस चाशु ॥ ३९ ॥
संसाधयन्नस्ति ततोऽथ विद्यां । निश्छद्मचित्तेषु स पापबुद्धिः ॥
अमोघया ह्येष तया समग्रं । विश्वं स्यान्नाशयितुं समर्थः ॥ ४० ॥
साधर्मिकप्रेमवशान्मयैत—न्निवेदितं वो विमृशध्वमन्तः ॥
ततः प्रतीकारमलं तदस्याः । कमप्यहो पांडुनरेन्द्रपुत्राः ॥ ४१ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

साधूक्तमेतद्भवता हिताया—विज्ञातमात्रं प्रभवत्यदो नः ॥
श्रीधर्मसूनुस्तमिदं निशम्य । सन्मानदानाद्विससर्ज तूर्णम् ॥ ४२ ॥

कुन्त्या कलत्रेण च पांडुपुत्रा । विमृश्य कृत्याबलवारणाय ॥
प्रमाणयन्तोऽथ तपश्च कायो—त्सर्गं मुदा चक्रुरतीव तुष्टाः ॥ ४३ ॥

तथैकपादाविरुहाग्रसंस्थाः । प्रदत्तनेत्राः किल तिग्मरश्मौ ॥
ते पांडवाः श्रीपरमेष्ठिमन्त्र—ध्यानस्थितास्तस्थुरतीव धैर्यौः ॥ ४४ ॥

दिनानि सप्तापि सुशीततापा—दिक्लेशभाजां किल पांडवानाम् ॥
जिनेश्वरध्यानसमाधिलीना—त्मनां सुखेन व्यतिचक्रमुश्च ॥ ४५ ॥

अथाष्टमेऽह्नि क्षितिभृच्छिरांसि । प्रोत्पाटयन् वायुरलं ससार ॥
यथा यथैषां स्थिरतां जगाम । तथा तथा ध्यानमहाप्रदीपः ॥ ४६ ॥

विश्वो रुनिःस्वानरवैर्गजेन्द्र—गर्जारवैरश्वसुहेषितैश्च ॥
समाह्वयन् किं दशदिग्नरेन्द्रान् । कुतोऽप्यकस्मात्कटकं समागात् ॥ ४७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ध्यानस्थिते कश्चिदुपेत्य कुन्ती—कृष्णौ हयस्कन्धमथाधिरोप्य ॥
समाययौ स्वं कटकं क्षणेन । भयंकरं मत्तगजाश्ववारैः ॥ ४८ ॥
हा वत्स हा भीम रणेऽतिशूर । हा पार्थ दुर्वारविपक्षकाल ॥
नौ ताड्यमाने सुतराममीभी । रक्षध्वमुच्चैर्निजमातृभक्ताः ॥ ४९ ॥

कुन्ती सकृष्णा घनताड्यमाना—तिरोषतस्तैस्तु कशाप्रहारैः ॥
प्रोच्चैर्विलापान् कुरुतेस्म पुत्रा—भिधां गृहीत्वा करुणस्वरेण ॥ ५० ॥

ततो निशम्येति विमुक्तशुद्ध-ध्याना गृहीताखिलदिव्यशस्त्राः ॥
दधाविरे तूर्णमिभारिनादै—र्गर्जन्त एव प्रलयाब्धिवत्ते ॥ ५१ ॥
तच्छत्रुसैन्यं घनपार्थबाणा—सारैरपारैर्विदधे विभिन्नम् ॥
गदाप्रहारैर्निपतद्गजेन्द्रं । नश्यद्भटं वायुसुतश्च चक्रे ॥ ५२ ॥
कृपाणपाणिः किल धर्मसूनु—रन्यूनसंग्रामरसप्रसारः ॥
उदग्रकोपः खलु कालमूर्ति—रिवात्र भातिस्म तथा सरोषः ॥ ५३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तावस्खलन्तौ यमलौ च वर्षं—तौ प्रोल्लसन्मार्गणधोरणीश्च ॥
कोपाच्चरन्तावपि तच्चमूंषु । सुदुस्सहौ द्राग्सुतरामभूताम् ॥ ५४ ॥
धनञ्जयोग्रत्पवनांगजन्म—नाराचसश्चारगदाप्रहारैः ॥
सा दीनभावं प्रगता च सेना । निपीडितालं सहसा ननाश ॥ ५५ ॥
सैन्ये च नष्टे क्षणदृष्टभावे । द्रुतं च ताल्वोष्टविशोषिणी च ॥
तान् पांडुपुत्रान् सुतरामुदन्या । कृत्येव कामं परिबाधतेस्म ॥ ५६ ॥
तृषातुरा वारिविलोकनाय । वने भ्रमन्तः किल ते पुरस्तात् ॥
सरोजसंशोभितमध्यदेशं । व्यलोकयंस्तत्र तडागमेकम् ॥ ५७ ॥
संमूर्छिता इव तदंबुनिपातनस्ते । संसारिवत्क्षितितले व्यलुठन्नकस्मात् ॥
प्राग्निर्मितं किल कुकर्म न जायते हा । येनान्यथा भगवतां बलिनामपीह ॥ ५८ ॥
तत्र भ्रमन्ती द्रुपदात्मजापि । समागतात्मीयपतीन्निकामम् ॥
दुःखार्दितांस्तान् लुठतो निरीक्ष्य । व्यलोकयत्सर्वदिशोऽतिखिन्ना ॥ ५९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इतस्त्वकस्माद्घनवल्लिजालै—र्निबद्धकेशप्रवराथ काचित् ॥
वनेचरस्त्री प्रकटीबभूव । तदग्रतो वल्कलचारुवस्त्रा ॥ ६० ॥

विवक्ति यावद् द्रुपदात्मजापि । किञ्चिन्निवृत्ता किल तत्पुरस्था ॥
धूम्येव तावद्धवलासितांगी । समागता द्राग्गगनाध्वना च ॥ ६१ ॥

विशीर्णकेशप्रकरा दवाग्नि—पीतं स्वशीर्षं सुतरां दधाना ॥
महत्कपालं च तदन्तराले । रौद्रानना रौद्रविलोचना च ॥ ६२ ॥

सा कृत्तिका प्रौढकपालपाणि—र्महाट्टहासैरतिभीषणा च ॥
कृत्याभिधाना खलु राक्षसीयं । संक्षोभयंत्याविरभूत् त्रिलोकम् ॥ ६३ ॥

तान् वीक्ष्य भूमौ लुठतः प्रकामं । कृत्या स्वकृत्यैकनिबद्धचित्ता ॥
बभ्राम तस्याः परितो विलोलां । लोलां मुखाब्जे किल लोलयन्ती ॥ ६४ ॥

तद्दर्शनोद्भूतभयाकुलाङ्गीम् । विधाय कृष्णां च निजांतरे द्राग् ॥
सा भिल्लपत्नी निजगाद कृत्या—मकृत्यगां कोमलया गिरेति ॥ ६५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वदागमोद्दंडसमीरणेना––तिव्याकुलाश्चमंशरीरिणोऽमी ॥
भयेन मूर्छामगमंश्च देवि । प्राणानपि क्षिप्रमलं जहुश्च ॥ ६६ ॥
न कोऽपि दैत्यामरमानवेषु । समस्मि विश्वत्रितयेऽपि देवि ॥
सहेत यस्ते सुतरां प्रकोपं । वज्रं यथा वज्रधरस्य लोके ॥ ६७ ॥

स्वयं मृतानेव पुनः किमेतान् । कृत्ये ततो मारयसीह देवि ॥
न विद्यते पौरुषमत्र किञ्चि—ज्जगज्जनक्षोभकृतस्तवैव ॥ ६८ ॥

सम्बोधितैवं बहुभक्तियुक्त––वाग्भिस्तया स्वं कृतकृत्यमन्तः ॥
द्राग्मन्यमाना सुतरां हसित्वा । कृत्या ययौ काप्यफलप्रयासा ॥ ६९ ॥
अथोपसृत्य द्रुपदात्मजापि । मृतानिवालोक्य पतीन् स्वकीयान् ॥
मूर्छावसाने प्रललाप कामं । पुनः पुनर्भर्तृवियोगदुःखात् ॥ ७० ॥
तस्याः प्रमार्ज्याश्रुभरं जगाद । हृष्टाशया भिल्लनितंबिनीयम् ॥
बाले कथं रोदिषि हा सुशीले । वृथा महारण्यगता सती त्वम् ॥ ७१ ॥

P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

संमूर्छितान् सुन्दरि मायर्यैतान् । जलैः पवित्रैर्मणिकालिकायाः ॥
नद्याः स्वभर्तृनमृतैरिवाभि—षिच्य क्षणाज्जीवय शुद्धशीले ॥ ७२ ॥
तया तथैव प्रकृतेऽथ सुसो—त्थिता इवैते द्रुपदात्मजायाः ॥
सुकोमलैः सद्वचनैः स्वचित्ते । द्राग् चिन्तयामासुरितीदमुच्चैः ॥ ७३ ॥
कोऽयं नरेन्द्रः स्वकसैन्यभारै—रत्रागमत्केन च याज्ञसेनी ॥
तथा ह्यपाहारि सरः क चैत—द्विषांबुमन्नः किल मूर्छनं किम् ॥ ७४ ॥
अस्याः पुलिंद्या वचनप्रपञ्चैः । प्राणप्रियाथ स्वयमागतात्र ॥
नद्या जलौघैर्मणिकालिकायाः । प्रमोदतोऽस्मानुदजीवयद्वा ॥ ७५ ॥
किमस्ति चित्ते खलु विभ्रमोऽयं । किं वा महद्दैवविजृंभितं किम् ॥
सुस्वप्नदृष्टार्थं इवाद्भुतं श्री—निबन्धनं तत्किमिदं स्वरूपम् ॥ ७६ ॥
चिन्तापरेष्वेवमिमेष सद्यो । विद्योतयन् भास्वरतेजसाशाः ॥
वृन्दारकः कोऽपि पुरोऽथ भूत्वा । शुद्धात्मनस्तानिति भाषतेस्म ॥ ७७ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चिन्ताथ मे चतसि धर्मसूनो । कर्मण्यमुष्मिन् कथमाशु यस्मात् ॥
मायेयमुच्चै रचिता मयाहो । कृत्यानिताकृयत्विधानदक्षा ॥ ७८ ॥

युष्माकमुच्चैः परमेष्ठिमन्त्र—ध्यानेन तुष्टो हरिणैगमेष्यहम् ॥
सुरेश्वरानीकपतिर्विधाय । मायां ततोऽवञ्चयमाशु कृत्याम् ॥ ७९ ॥

काले भवद्भिः स्मरणीय एवे—त्युक्त्वा समग्राभरणानि दत्वा ॥
विसर्जितस्तैः सुरलोकमाप । वृन्दारकोऽसौ परमर्द्धिकः श्राक् ॥ ८० ॥

प्राक्पुण्ययोगाद्विगतान्तराया । विशेषतस्ते खलु पांडुपुत्राः ॥
सदा जिनध्यानविधानलीनाः । सर्वे बभूवुः सुसमाधिभाजः ॥ ८१ ॥

मध्याह्नकाले त्वशनेऽथ जाते—ऽन्यदा सदा पुण्यपवित्रगात्रः ॥
कश्चिन्महात्मा तपसोऽवसाने । तत्रागमत्पारणकाय साधुः ॥ ८२ ॥

क्षमासुधाधाम निरीक्ष्य साक्षात् । साधुं पवित्रं खलु पांडुपुत्राः ॥
प्रदक्षिणापूर्वमथ प्रणेमु—र्हर्षप्रकर्षेण विशुद्धभावाः ॥ ८३ ॥

P.P.A.C. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रोमांचचञ्चद्वपुषोऽथ भेत्तुं । समुद्यताः पापभरं स्तुवन्तः ॥
सुदानमानन्दभरेण भक्त्या । मुनीश्वराय प्रददुर्विशुद्धम् ॥ ८४ ॥
नेदुर्भृशं दुन्दुभयस्तदा खे । तथाभवन् काचनवृष्टयश्च ॥
सच्चेलवृष्टिश्च जयेत्यमेया । वाणी विनाशिनी च पापराशेः ॥ ८५ ॥

सद्दानमाहात्म्यवशेन वत्सा—स्तुष्टास्म्यहं शासनदेवता वः ॥
सा द्वादशाब्दी किल दुस्सहैवं । जगाम वः प्राग्भवपुण्ययोगात् ॥ ८६ ॥

त्रयोदशं वर्षमितोऽथ मत्स्य—देशस्थिता नूनमहो भवन्तः ॥
सर्वे परावर्तपराः स्ववेष--श्रियाः शिवार्थं किल पूरयन्तु ॥ ८७ ॥

सेत्युक्तिपूर्वं च तिरोबभूव । ते पांडुपुत्रा अपि तद्वचोऽलम् ॥
सम्भूय भूयो विमृशंति तत्र । जानन्त एव स्वघनप्रतिज्ञाम् ॥ ८८ ॥

कङ्काभिधानो द्विजवेषधारी । स्थास्येऽथ वैराटनरेन्द्रगेहे ॥
जगाविति स्वेप्सितजातसिद्धि—निबन्धनं धर्मसुतोऽनुजाग्रे ॥ ८९ ॥




P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भीमोऽप्यधत्तात्र नरेन्द्रसूदः । स्थास्ये ततो पल्लवनामधारी ॥
बृहन्नडाख्यो भविताहमेष । तदाम्नि पार्थोऽप्यवदत्किलेति ॥ ९० ॥
अश्वाधिभूर्ग्रन्थिकनामधारी । स्थाताहमस्मिन्नकुलो जगौ च ॥
स्थास्यामि गोविन्द इहैव तत्र । पालाभिधः प्राह लघुस्त्वदीयः ॥ ९१ ॥
सैरन्ध्र्यहं तस्य नृपस्य पत्न्या । नूनं भविष्यामि जगौ च कृष्णा ॥
विराटराष्ट्रं च यथोक्तवेष—भृतोऽगुरज्ञाततमास्ततस्ते ॥ ९२ ॥
ततः श्मशाने नगरीसमीपे । तिरोहिते प्रौढशतेन शम्याः ॥
स्कन्धेऽप्यधुः स्वीयसमस्तशस्त्र—चयं ततः पांडुनरेन्द्रपुत्राः ॥ ९३ ॥
प्राप्ताः सभां तत्र विराटराज्ञा । ते स्वस्वकृत्ये क्रमतो नियुक्ताः ॥
सन्मानितास्तत्र सुखेन तस्थु—स्ते गुप्तवेषाः किल पांडुपुत्राः ॥ ९४ ॥
प्रातः समुत्थाय च मातरं स्वां । गुप्तां क्वचिद्वेश्मनि नेमुरुच्चैः ॥
ते प्रत्यहं पांडुसुतास्तदुक्तां । शिक्षां हितां संदधुरादरात्‍च ॥ ९५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सम्प्रेषितान् मल्लभटांश्च दुर्यो—धनेन भीमः किल सूदवृत्त्या ॥
तत्र स्थितोऽसौ निजघान युद्धे । विशेषतो मानमवाप राज्ञः ॥ ९६ ॥
पञ्चोत्तरं तत्र शतं सुदेष्णा—सहोदरा भूपतिशालकाश्च ॥
बभूवुरेतेषु हि कीचकाख्यः । समस्ति मुख्यो भुजवीर्यशाली ॥ ९७ ॥
कदापि मोहाद्भगिनीसुदेष्णागेहं गतः सोऽपि ददर्श कृष्णाम् ॥
तद्रूपलावण्यमगण्यमुच्चै—र्विलोक्य मोहं समवाप चाशु ॥ ९८ ॥
रोमाञ्चदम्भेन मनोजबाणा—निवबाहन्नेष समग्रदेहे ॥
गजाम सद्यो निजवासगेहे । धुन्वन् स्वमूर्धानमथादरेण ॥ ९९ ॥
स्मरोपचारप्रवरैर्वचोभिः । स प्रार्थयंस्तां द्रुपदात्मजां च ॥
धिक्कारमस्याः समवाप यस्मा—दकार्यतः को लघुतां न याति ॥ १०० ॥
कामं कलाकेलिपिशाचचण्ड—च्छलप्रणष्टानुचेतनः सः ॥
ततः सुदेष्णास्वसुरात्मभावं । न्यवेदयत्कृत्स्नमथातिकृष्णः ॥ १०१ ॥



R.P.A.C. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कामज्वरार्त्तं सुतरां सुदेष्णा । तमाह केनापि मिषेण बन्धो ॥
समेष्यति त्वन्निलयं ममैषा—देशात्ततः स्वेष्टमतः कुरु त्वम् ॥ १०२ ॥
आश्वासितस्तूर्णमसौ तयेति । जगाम गेहं स्मरतापतप्तः ॥
व्याजेन केनापि ततो महिष्या । सम्प्रेषिता कीचकधाम्नि कृष्णा ॥ १०३ ॥
भून्यस्तनेत्रां द्रुपदात्मजां चा—यातां स्वगेहे स च कीचकः प्राक् ॥
उत्थाय विस्तारितपाणिपद्मो । जगौ च कामोग्रतयातितप्तः ॥ १०४ ॥
एह्येहि लोलाक्षि मदीयदेहे । ह्यालिंगनं त्वं रभसेन देहि ॥
ततः परिष्वङ्गमनन्ततापतप्तं च मां प्रीणय दिव्यरूपे ॥ १०५ ॥
श्रुत्वेति कर्णासुखकारि तस्याः । वाक्यं पुनः प्राह च याज्ञसेनी ॥
रे मूढ मावोच इतीह मह्यं । दुष्टात्मवन्नीचकुलोचितं हा ॥ १०६ ॥
गुप्ता मदीयाः पतयो भवन्त—मुन्मार्गगं नीतिविमुक्तमुच्चैः ॥
नूनं नयिष्यन्ति यमस्य सद्म—समाश्रयत्वं खलु तत्त्वमेवम् ॥ १०७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्यालपन्तीं द्रुपदात्मजां तां । धृत्वा कबर्यां चरणैर्जघान ॥
सा जातशीलातिशयोग्रवीर्या—स्तन्मोक्षमासाद्य नृपं समागात् ॥ १०८ ॥

युधिष्ठिरं तत्र विलोक्य कीर्ण—केशाथ कृष्णा विललाप गाढम् ॥
स्वभर्तृगुप्तोदितनामवर्णं—पूर्वं सती सा वदतीति राज्ञः ॥ १०९ ॥

स्थिरा रणे ये किल भूमिनाथा—स्तथा जयांकाः किल दोर्भृतोऽपि ॥
तेषु प्रियेषु क्षितिपाल सत्सु । कदर्थिताहं किल कीचकेन ॥ ११० ॥

इत्यालपन्तीं किल कूटरोषा—क्षरं च कृष्णां समुवाच कङ्कः ॥
चेत्संति गुप्ताः पतयः क्वचित्ते । केचिन्महावीर्ययुजश्चलाक्षि ॥ १११ ॥

कोऽप्यस्ति भीमस्तव वल्लभश्चेत् । त्राता स हि त्वां नियमेन कामम् ॥
पंकेरुहास्ये किल मात्र विघ्नी—भूया व्रज स्वीयनिकेतनं च ॥ ११२ ॥

सैवं निशम्य प्रगता निशाया—मचीकथत्तत्पवनात्मजाय ॥
आश्वास्य भीमोऽपि मृदूक्तिभिस्ता—मित्यूचिवान् मोहनिमग्नचित्तः ॥ ११३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दृष्टं मया यत्र सुयोधनाग--स्तद्धर्मपुत्रा हितसत्यसन्धा ॥
न साम्प्रतं साम्प्रतमेव सोढुं । ममेदृशं सुन्दरि कीचकाणः ॥ ११४ ॥
सकूटसङ्गोक्तिभरैस्तमद्य । समानय त्वं रजनीविभागे ॥
क्लिष्टं त्वदीयं समरे यथाहं । निहन्मि रङ्गस्य हि मण्डपे द्राग् ॥ ११५ ॥
आश्वासिता सेति समीरजेन । तं कीचकं द्राग्मीलितं च मार्गे ॥
ततः सभायामतिकूटनेह--वाक्यैः समाकारयतिस्म रात्रौ ॥ ११६ ॥
वचोभिरेतैः स शठोऽतिहृष्ट--स्ततो निशायाः प्रथमे च यामे ॥
कुत्रासि कुत्रासि सुलोचने त्वमित्युच्चरन्मण्डपमाययौ द्राग् ॥ ११७ ॥
सुद्रौपदीवेषधरस्तु भीमः । प्रोच्चैः समालिंगनघट्टनेन ॥
निहत्य तं प्रापदहृष्टचारी । महानसं सत्वरमुद्धतात्मा ॥ ११८ ॥
मृतं विलोक्याथ च कीचकं तं । तद्बान्धवास्ते घनशोकमग्नाः ॥
आरोप्य सद्यः शिबिकां प्रयान्तो--ऽपश्यन् पुरस्ताद् द्रुपदात्मजां ताम् ॥ ११९ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

एतन्निमित्तं निजबन्धुघातो--ऽभवद्वदन्तस्त्विति तेऽथ तां च ॥
केशेषु धृत्वा चक्रुश्चिताग्नौ । समुत्सुकाः क्षेप्तुमतिप्रकोपात् ॥ १२० ॥
भर्तॄन् स्मरन्ती हृदये प्रकामं । मृत्योर्भिया श्रीद्रुपदात्मजा सा ॥
चितासमीपं जगृहे ततस्तैः । स्वकीयलक्ष्मीरिव देहिनो द्राग् ॥ १२१ ॥
कृतोऽप्यकस्माद्बकराक्षसारिः । समेत्य चोन्मूल्य ततो महद्द्रून् ॥
प्रकुट्टयित्वा किल कैश्च कांस्तां--श्चिक्षेप वह्नौ बलवान् बलेन ॥ १२२ ॥
दत्वा कृशानावलमाहुतीश्च । तैः कैचकैः प्राक् बकराक्षसद्विट् ॥
निरस्तविघ्नप्रकरां च कृष्णां । चकार शांतिश्रियमङ्गिनीं किम् ॥ १२३ ॥
ज्ञात्वाथ तान् सूदहतान् स्वबन्धून् । शोकात्सुदेष्णां घनविह्वलाङ्गीम् ॥
विराटराजा निजगाद पूर्व--मुल्लास्य च स्नेहवशेन कामम् ॥ १२४ ॥
चिन्तां विमुञ्चाथ हि चेतसस्ते । कुरुष्व मा मां वितथप्रतिज्ञम् ॥
विमुक्तकोपा सुभगानने सै-रंध्रीं ततो धाम्नि समानय त्वम् ॥ १२५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वरूपभाजः पतयस्तदीयाः । प्राप्तेऽथ काले स्वयमेवमेनाम् ॥
नैष्यन्ति बुद्धाजनि सुस्थितात्मा । राज्ञी क्रमात्तां स्वगृहे निनाय ॥ १२६ ॥
देशानथालोक्य सुयोधनाज्ञा—वशादद्रष्ट्वा किल पांडुपुत्रान् ॥
समेत्य पश्चाद्बहुशश्चरेन्द्रा । व्यजिज्ञपन् स्वं गुरुधार्त्तराष्ट्रम् ॥ १२७ ॥
नरेश्वर त्वद्भयसागरांत—स्ते पांडवाः कच्छपवन्निमग्नाः ॥
संतोऽप्यसन्तो भुवने वने वा—स्माभिः क्वचिद्भूवलये न लब्धाः ॥ १२८ ॥
चरोक्तमाकर्ण्य सुयोधनोऽसौ । भीष्मक्षमाभृद्विदुराननाब्जे ॥
व्यलोकयत्तावथ चाहतुस्तं । सम्यक्परिज्ञाय तदीयभावम् ॥ १२९ ॥
स्युस्ते च वै यत्र न भीतिरस्ति । न चामया यत्र न दौःस्थ्यभावः ॥
लक्ष्यन्त एते किल पांडुपुत्रा—स्तत्र स्वयं जैनविहारवर्यं ॥ १३० ॥
इतश्च ते प्राहुरथावनीश । देशेष्वशेषेषु च मत्स्यदेशः ॥
धान्यैर्धनैर्लौकसुखैश्च सर्वा—धिव्याधिमुक्तः स्वरिवाशु भाति ॥ १३१ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

अथाददे वाग्भरमेष दुर्यो—धनः कथं ते किल तत्र गुप्ताः ॥
ज्ञेया महाशल्यमिवान्तरङ्ग—व्यथाकरा बाह्यभयोज्झिताश्च ॥ १३२ ॥

ततः सुशर्मान्नृपतिः प्रणम्य । सुयोधनं तं निजगाद सद्यः ॥
ते पांडुपुत्राः सुतरां समृद्धे । चरन्ति नूनं नृप मत्स्यदेशे ॥ १३३ ॥

हरामहे मत्स्यनरेन्द्रपुर्या—स्तद्गोकुलं भूमिपतेऽथ तूर्णम् ।
यथा ह्यकाले स्वयमेव पांडु—नरेन्द्रपुत्राः प्रकटीभवन्ति ॥ १३४ ॥

श्रीमत्स्यदेशाधिपतिः परं स । वैर्येकतो नः स निगृह्य एव ॥
अथान्यतो गोहरणेन पांडु—नृपांगजाविष्करणं च कार्यम् ॥ १३५ ॥

सुयुक्तियुक्तं नृपतिर्विचार्य । ततः सुशर्माणमथादिदेश ॥
ततः सुशर्मा सुरभीरभीः सो—ऽहरद्विराटस्य पुरः ससैन्यः ॥ १३६ ॥

गोपाल आगत्य विराटभूपं । नमंस्तदा प्राह भयातुरात्मा ॥
जहार गा नो ह्यधुना सुशर्मा । यः कीचकेनापि पुरा जितोऽभूत् ॥ १३७ ॥



P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

कुर्वंस्त्रिलोकीं बधिरां धनुष्क--टङ्कारवात्सैन्ययुतोऽथ भूपः ॥
स्वचित्तसञ्जातमहाप्रकोपा—दावेष्टयद्वैरिबलं च सद्यः ॥ १३८ ॥
परस्परामर्षवतां रणाब्धि—मन्थानकानां किल पार्थिवानाम् ॥
तेषां शरौघैर्गगनं समस्तं । संव्यानशे वैरिविनाशदक्षैः ॥ १३९ ॥
क्षणात्सहस्रांशुरिवान्धकार--श्रेणिं विराटक्षितिपोऽवधीच्च ॥
विपक्षलक्षं समवाप चास्तं । सहस्रभानुः परदुःखदुःखी ॥ १४० ॥
प्रातः स्वतादृग्सुभटौघभङ्गात् । क्रुद्धस्त्रिगर्तक्षितिपस्ततः सन् ॥
संधानयन्नात्मशरासनं द्रा--गधावत प्रोद्धतमत्स्यभूपम् ॥ १४१ ॥
अथो विमुक्तेन सुशर्मराज्ञा । प्रोद्दण्डकाण्डप्रकरेण सद्यः ॥
संग्रामसिन्धौ विधुरः प्रकामं । बभूव वै मत्स्यविशांपतीशः ॥ १४२ ॥
क्षणाभिरस्त्रं विरथं च बद्ध्वा । क्षिप्त्वा रथे मत्स्यनरेन्द्रमाशु ॥
त्रिगर्तभूमिपतिरात्मसैन्य—युतोऽचलत्कौरवराट्समीपे ॥ १४३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

युधिष्ठिरश्रीपवनात्मजाद्याः । क्रुद्धोरताः शस्त्रभृतः समग्राः ॥
ततस्त्रिगर्तेशभटान् समस्तान् । संहारयामासुरमेयवीर्याः ॥ १४४ ॥
रेरे प्रयासि क भटाभिमानि-न्नित्यादि चोक्त्वाथ सुशर्मभूपः ॥
भीमेन बद्धः किल बन्धमुक्तं । प्रकुर्वता मत्स्यनृपं क्षणेन ॥ १४५ ॥
तदातिहृष्टः स विराटराजा । तत्रैव रात्रौ सुमहोत्सवैश्च ॥
उवास धर्मात्मभवेन पांडु--नृपात्मजाख्यातयुतः ससैन्यः ॥ १४६ ॥
अथोत्तरस्यां दिशि गाः समग्रा । मुक्ताः प्रभाते स योधनो राट् ॥
विचारमुक्तस्तु जहार हारि--विराटपुर्याः सविधिस्थिताश्च ॥ १४७ ॥
गोपः समेत्य त्वरितं ततोन्तः--पुरस्थसत्वाढ्यरमकुमारम् ॥
न्यवेदयद्गोहरणं ततोऽसौ । प्राहेति भार्याजननीपुरस्तात् ॥ १४८ ॥
रणं कथं मातरहं प्रकुर्वे--ऽधुना न मे सारथिरस्ति तादृग् ॥
एकोऽपि कोपात्कुरुजेन्द्रसैनं । निहन्मि येनेभघटामिभारिः ॥ १४९ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निशम्य तस्योर्जितमेवमुच्चैः । सेर्ष्याथ कृष्णा तमुवाच सद्यः ॥
बृहन्नडाख्यस्तव यो भगिन्याः । कलाप्रदः सारथिरेष तेऽस्तु ॥ १५० ॥

अथानुजं प्रेष्य ततः कुमार-वरः समाकार्य बृहन्नडं च ॥
द्रागधारयामास च सारथित्वं । बहुप्रयासेन तदा प्रमोदात् ॥ १५१ ॥

पूर्वं दधद्व्यत्ययतोऽङ्गनौघं । महासयन् सत्कवचं विधृत्य ॥
क्षणादथाध्यास्त महारथं श्री—कुमारयुक्तस्त्रिदशेन्द्रसूनुः ॥ १५२ ॥

पूर्वं समभ्यस्तकलाभिरेष । निन्ये रथः कौरवसैन्यपार्श्वे ॥
पार्थेन सद्यः कुमरस्तदुग्र—मालोक्य सैन्यं सहसैव भीतः ॥ १५३ ॥

बृहन्नडं प्राह महानुभाव । पश्चाद्रथं वालय वालयेति ॥
विलोकितुं नालमहं प्रसर्प—त्सैन्यं महांभोनिधिवद्भवामि ॥ १५४ ॥

पार्थो हसित्वाह कुमारवीर । प्रौढक्षितीशान्वयभूरसि त्वम् ॥
स्वमातृभार्यासविधे तदुक्त्वा—धुना किमेतत्किल वक्षसीह ॥ १५५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

महारणारम्भकृतां भटानां । साम्राज्यलाभाय च जीवितव्यम् ॥
मृतिर्भवेऽस्मिन् यशसे परत्र । देवांगनातिथ्यकृते भवेद्यः ॥ १५६ ॥
मृत्योर्यशःकीर्तिफलं च युध्धे । समस्तु मा मे कलहायमानम् ॥
तस्मै जगादेति गिरं कुमारः । कामं भयेनातुरचित्तवृत्तेः ॥ १५७ ॥
रथादिति प्रोच्य स भूपसूनुः । प्रदत्तझम्पः खलु गन्तुकामः ॥
प्रदत्तझम्पेन तदीयपृष्ठे । प्रोचे सुरेशांगभुवाथ तूर्णम् ॥ १५८ ॥
धीरो भवानुत्तरराजपुत्र । त्वं सारथिर्मे भव शक्रसूनोः ॥
इमानरीन् येन विजित्य कीर्तिं । संस्थापयामि त्वयि विश्वगां द्राग् ॥ १५९ ॥
शराकराकीर्णमतः स्ववाणं । शरासनं मे भयमुक्तचेताः ॥
समानय त्वं नृपपुत्रशस्य । स्कन्धांतरायेन निहन्मि तेऽरीन् ॥ १६० ॥
शरासने बाणयुतेऽथ तेना—नीते स्वरूपं स्वकलाधिकानाम् ॥
प्रोच्येन्द्रसूनुर्निगृहीतशस्त्रो-ऽचलद्विपक्षाभिमुखं रथस्थः ॥ १६१ ॥



P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इतश्च गङ्गातनयो निरीक्ष्य । तं दिव्यशंखध्वनिभैरवं द्राग् ॥
दुर्योधनं प्राह धनञ्जयोऽयं । स्त्रीवेषधारी किल दृश्यते च ॥ १६२ ॥
प्राप्ता अमी तत्समयेऽथ नून—मागस्करं त्वां सह बन्धुभिश्च ॥
सद्यो हनिष्यन्त्यधुना ततस्त्व—मनेन सन्धेहि धनञ्जयेन ॥ १६३ ॥
नो चेन्महत्सैन्यचतुर्थभागो—पेतः स्वगोभिः सह याहि याहि ॥
रक्ष्यो हि नूनं निखिलैः प्रकारैः । स्वामी स्थिता भो वयमस्य मध्ये ॥ १६४ ॥
पितामहादेवमथं निशम्य । मन्त्रं च दुर्योधन एष भीरुः ॥
आदाय तद्गोकुलमात्मसैन्य—भागेन साकं त्वरितं चचाल ॥ १६५ ॥
तद्वीक्ष्य पार्थः कुमरं जगाद । पलायतेऽसौ मम भूरिभीत्या ॥
दुर्योधनस्तत्तुरगानिह त्वं । कुमारराट् चालय चालयाशु ॥ १६६ ॥
तथा प्रणुन्नश्च रथः पतङ्ग—रथोपमानः कुमरेण तेन ॥
संप्राप तत्कालमथारिसैन्यं । तथा सदैन्यं कपिकेतुदृष्टेः ॥ १६७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पार्थोऽथ दध्मौ निजशंखमाशु । तथा च तन्नादविमोहितास्ताः ॥
गावः स्वयं व्याजुघुटुः पुरं स्वं । प्रत्यूर्ध्वपुच्छाश्च यथा समस्ताः ॥ १६८ ॥
वंशे विशुध्धे भवता कलङ्को । दत्तोऽथ पूर्वं हरताऽत्र गावः ॥
प्रणश्यतातो भवताधुनेति । दुर्योधनं प्राह धनंजयः श्राक् ॥ १६९ ॥
तथाविपक्षे मिलितेऽथ मूढ किं शक्यते गन्तुमितो भयेन ॥
तत्तिष्ट सन्धेहि धनुर्निगद्ये—त्यधिज्यमाधत्त धनुश्च पार्थः ॥ १७० ॥
तदेन्द्रपुत्रस्य विसारिबाणा—सारैः समन्तात्परिपूरिते खे ॥
स्वच्छेदभीत्यापसृतेषु भानु—करेषु किं द्राग्प्रसृत तमोभिः ॥ १७१ ॥
दयार्द्रचित्तः प्रविलोक्य वीर—कोटिक्षयं श्रीमघवत्तनूजः ॥
संमोहनं नाम मुमोच शस्त्रं । स्वापप्रदं सर्वनृणां समन्तात् ॥ १७२ ॥
पितामहं द्रोणगुरुं च मुक्त्वा । परेषु निद्रावशगेषु गाढम् ॥
स्मृतोत्तरातद्वचनोऽथ पार्थः । श्रीमत्स्यभूपांगभवं जगाद ॥ १७३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निलानि दुर्योधनभूमिनेतुः । पीतानि मार्तण्डतनूभवस्य ॥
विचित्रवर्णानि तथेतराणा—मथाहर त्वं द्रुतमम्बराणि ॥ १७४ ॥

आदाय वासांसि तथा च तेना—नीतानि तेषां च पितामहेशाम् ॥
प्रणामपूर्वं विनिवृत्य पार्थः । प्रापत्पुरं वैरिदलं मथित्वा ॥ १७५ ॥

तत्प्राक् विराटो विजयी नरेन्द्रः । प्रमोदभाक्प्राप पुरं स्वकीयम् ॥
स्वेभ्यस्तथा पृष्टगतं रिपूणां । ज्ञात्वा सुतं किञ्चिददूयत द्राग् ॥ १७६ ॥

समाह्वयेधावदलं स्वसैन्य—मात्मीयपुत्रानुगतिस्पृहः सन् ॥
तावत्कुमारस्य चरैः समेत्य । मुदा जयोऽशंसि नृपाय सद्यः ॥ १७७ ॥

संतुष्टचित्तः स नृपः प्रमोदा—दकारयत्तन्नगरोत्सवं च ॥
चकार कंकेन समं सभायां । क्रीडां स्वयं बन्धुरसारिपाशैः ॥ १७८ ॥

तथा प्रशंसन्तमलं स्वपुत्र—जयं नृपं प्राह स धर्मसूनुः ॥
जयोऽस्य किं नो सुलभो नरेन्द्र । बृहन्नडो यस्य बभूव सार्धम् ॥ १७९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इतो निजस्यन्दनतोऽवतीर्य । निजाश्रये शक्रसुते प्रयाते ॥
नत्वोत्तराख्यः कुमरः सभास्थं । नरेश्वरं शीघ्रमुपाविशच्च ॥ १८० ॥
जगाद भूपाल मया रयेण । यस्माज्जयोऽयं समवापि युध्धे ॥
प्रत्यक्षतामेष्यति बन्धुयुक्त—स्त्र्यहः स्वयं सोऽपि तवोग्रवीर्य ॥ १८१ ॥
ततस्तृतीयेऽह्नि स धर्मपुत्रः । स्नानं विधायाद्भुतवेषधारी ॥
कृतार्हतार्चो बलिकर्म चक्रे । क्षुद्रामरेभ्यः स्वशिवाय सद्यः ॥ १८२ ॥
सिंहासनस्थं किल धर्मपुत्रं । स्वरूपभाजः पवनात्मजाद्याः ॥
नेमुः स्वभक्त्यावगतस्वरूपः । श्रीमद्विराटक्षितिपोऽपि च द्राग् ॥ १८३ ॥
साम्राज्यमेतद्विभवः समग्र—स्तवेतरत्सर्वमपि त्वदीयम् ॥
एवं विराटेन नरेश्वरेण । मुदं गतः प्रार्थितधर्मसूनुः ॥ १८४ ॥
मत्वोत्तराख्यां स्वसुतां विराटो—ऽभिमन्यवे पार्थसुताय योग्याम् ॥
एवं मुदा धर्मसुतं नरेन्द्रं । व्यजिज्ञपद्योजितपाणिपद्मः ॥ १८५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स द्वारिकाया अभिमन्युनाम—कुमारसारं द्रुतमानिनाय ॥
स्वभागिनेयेन समं ससैन्य—स्तत्रागमत्तुष्टमना मुकुन्दः ॥ १८६ ॥

श्रीमत्स्यभूमिपतिपांडवानां । हर्षप्रदं शुद्धदिने सुलग्ने ॥
प्रीत्याभिमन्यूत्तरयोश्च पाणि—ग्रहोत्सवं विष्णुरयं चकार ॥ १८७ ॥

अथाच्युतस्तुष्टमना विराटानुज्ञामथावाप्य तथात्मपुर्याम् ॥
अत्याग्रहात्सोत्सवमात्मनीनान् । कुन्त्या समं पांडुसुताभिनाय ॥ १८८ ॥

कन्याश्चतस्रः प्रवराश्च चत्वा—रः पांडवास्तत्र हि पर्यणेषुः ॥
श्रीयादवानामथ रामकृष्ण—महाग्रहात्ते पुरि तत्र तस्थुः ॥ १८९ ॥

एवं जातयशोभराः प्रतिपदं लोकोपकारे रता ।
रक्षोभीतिहरेण वायुजनुषा पार्थोल्लसद्विक्रमाः ॥
द्यूतभ्रष्टसमस्तराज्यविभवाः कृत्यादिविघ्नोज्झिताः ।
स्वां सन्धां परिपूर्य मत्स्यपपुरात्ते द्वारिकायामगुः ॥ १९० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इति तपागच्छाधिराजश्रीसोमसुन्दरसूरिसन्ताने वाचनाचार्यमण्डलीशिरोमणिपण्डितश्री-
साधुविजयगणिशिष्यपण्डितश्रीशुभवर्धनगणिविरचिते श्रीपांडवचरित्रे
महाकाव्ये हिडंबादिजयहिडम्बादिपाणिग्रहणार्जुनविद्यासाधन-
खेचरेन्द्रादिजयकृत्यादिविघ्ननिवर्तनगोवालनादिवर्णन-
नामा पञ्चमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ षष्ठः सर्गः प्रारभ्यते ॥

गर्भस्थितस्यातिशयेन यस्य । न क्वापि माता विजिता स्वपित्रा ॥
ततोऽजिताख्यो हरताज्जिनेन्द्रः । सद्भक्तिभाजामशिवानि नित्यम् ॥ १ ॥
अथो दशार्हा दश चान्यभूपाः । श्रीरामकृष्णौ पुरुषा महान्तः ॥
श्रीयादवेन्द्रा निखिला मिलित्वा । व्यमन्त्रयन् पांडुसुतैरिहैवम् ॥ २ ॥



P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सत्यप्रतिज्ञैः कुलजैश्च सेहे—ऽरिचेष्टितं सर्वमहो भवद्भिः ॥
सम्प्राप्तकालैरधुना च वैरि—द्रुमा विनाशं द्रुतमाननीयाः ॥ ३ ॥
धर्मांगजन्माथ जगाद नाहं । स्वबांधवान् हन्मि हि राज्यहेतोः ॥
भीमोऽवदद्वैरिविवृद्धिभावं । सोढाभवं नाहमथाभिभूतेः ॥ ४ ॥
युधिष्ठिरः प्राह स भीममुख्यां—श्चेद्विद्विषोऽमी समरोत्सुका हि ॥
वध्यास्तथाप्यात्मभिरेव बोध्याः । समोक्तिभिस्ते यशसेऽथ पूर्वम् ॥ ५ ॥
दशार्हरामाच्युतयादवेन्द्रा—देशादथ स्यन्दनसंस्थितः सन् ॥
सम्प्राप वाग्मी वरहस्तिनाग—पुरं जयाख्यः किल दूतचक्री ॥ ६ ॥
गङ्गाभवश्रीधृतराष्ट्रमुख्ये—ष्वथो निषण्णेषु नृपेषु सत्सु ॥
जयः सभामेत्य सुयोधनं तं । जगाविदं स्वामिबलादभीरुः ॥ ७ ॥
श्रीद्वारिकाधीश्वरजिष्णुदूत—स्त्वहं जयाख्योऽखिलराजमान्यः ॥
तद्वाचिकं भूमिपते सकर्णः । संस्त्वं समाकर्णय मन्मुखेन ॥ ८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सत्यप्रतिज्ञाः खलु पांडुपुत्रा--स्ते बान्धवास्ते समयं निजोक्तम् ॥
सम्प्राप्य सम्प्रत्यनयोज्झिता हि । प्रत्यक्षभावं प्रययुर्नरेन्द्र ॥ ९ ॥
कालं स्वकीयं गमयन्त एते । यथागतास्ते किल सत्यभावम् ॥
मुदा ददानाः स्वकराज्यभागं । तथा श्रयध्वं रभसेन यूयम् ॥ १०
भूपाल भूभागकृते पुरावत् । किलाधुनोच्चैर्युवयोरपीह ॥
परस्परं पक्षविनाशहेतु--र्मास्त्वाजिरारम्भकृतिर्नितान्तम् ॥ ११ ॥
श्रीवारुणावर्तपुरं किलेन्द्र--प्रस्थं च कामीपुरहस्तिनाख्ये ॥
ग्रामानिमान् पञ्च नृप प्रदाय । स्वेभ्यः समस्तं किल भुंक्ष्व राज्यम् ॥ १२ ॥
आकर्ण्य दूतोक्तमिति प्रकोपात् । दुर्योधनः प्राह दशन्निजौष्टम् ॥
कूर्चं स्पृशन् पाणितलेन चक्षु--र्निजांसयोर्दर्पभराद्ददच्च ॥ १३ ॥
कथं लभन्ते किल हारितं स्वं । राज्यं महाद्यूतपणादमी ते ॥
प्राग्भीममुख्या मम विद्विषोऽलं । महापराधास्तु बान्धवाश्च ॥ १४ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मद्रक्षितायां हि वसुन्धरायां । चरन्त्वमी पांडुसुता नयेन ॥
स एव तेषां वसुधाविभागः । स्यान्नापरं किञ्चिदिहार्पयेऽहम् ॥ १५ ॥
श्रीपांडुपुत्रा मयि चेदिमेऽलं । द्विषन्तु मित्रं त्वथवा जयाहो ॥
तथाप्यमीभ्यो न ददे धरिण्या । लवं क्वचिद् द्यूनपणेन लब्धम् ॥ १६ ॥
जयः पुनः प्राह नृप त्वयोक्तं । सुयुक्तियुक्तं नयमार्गगामि ॥
तथापि वाचं नृप संविधेहि । त्वं मुंच सद्गोत्रकदर्थनं च ॥ १७ ॥
हिडंबककीचकान् सकललोपशोकप्रदान् । परोपकृतये च यः पवनभूर्जघान द्रुतं ॥
सुयोधननरेश्वर त्वमिह रक्षितुं स्वं प्रभु—स्ततः कथमिभेंद्रवद् घनवनस्य शार्दूलतः ॥ १८ ॥
सदोपकारैकवता पुरात्वं । पार्थेन निर्जित्य च खेचरेंद्रात् ॥
यद्रक्षितोऽसि द्रुतमेव राजन् । तत्तेन पूज्यस्तव किं भवेन्न ॥ १९ ॥
धर्मैकसारः किल धर्मजन्मा । सुवत्सलस्त्वय्यपकारके यः ॥
सदा हितैषि किल चंदनः स्व—च्छिदं कुठारं सुरभीकरोति ॥ २० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पंचापि ते श्रीहरिणाधुनारि—गजावलीभीहरिणा बलिष्ठाः ॥
समीरणेनैव कृशानवो हि । धक्ष्यंति युष्मानिव काष्ठभारं ॥ २१ ॥
श्रीद्रोणभिष्मविदुरप्रमुखैर्नरेंद्रैः । प्रोचे प्रतिश्रुतिनिभं वचनं जयस्य ॥
भव्यं तदा तदनु तद्वचनैरमीभि—रस्यांतराधिकमजायत कोपवन्हिः ॥ २२ ॥
श्रीकृष्णदूतः सुतरामनेना—वधीरितोऽमर्षणमानसोलम् ॥
हता हता हा खलु धार्तराष्ट्रा । इत्युच्चरन्नेव विनिर्ययौ द्राग् ॥ २३ ॥
शीघ्रं समागत्य स दूतराजो । न्यवेदयत्कृष्णबलादिकेभ्यः ॥
मत्वा मनोऽभीष्टमतीव हृष्टा—स्ते भीममुख्या ननृतुश्च कामम् ॥ २४ ॥
महासमररसोध्धुरमनोऽनु कुलपांडवा । विचार्य च जनार्दनप्रमुखयादवेन्द्रैः समम् ॥
महासमरसज्जिकां रभसतो विधायोत्थकैः । समुद्रविजयादिभिः स्वदलभागमेवं व्यधुः ॥२५ ॥
श्रीयादवाः सत्यकिमत्स्यराज—श्रीद्रुपदद्युम्नपरश्चधृष्टाः ॥
तथा सुभद्रातनयादयश्चा—भरन्नृपाः पांडवसैन्यमध्ये ॥ २६ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पार्थस्य पुत्रस्त्वभिमन्युनामा । घटोत्कचः श्रीपवनात्मजस्य ॥
तथा परेषामपि शुद्धवंशो–द्भवाः समेयुस्तनया इहाशु ॥ २७ ॥
चन्द्रस्तथेन्द्रो मणिचूडचन्द्रा–पीडौ च चित्रांगदखेचरश्च ॥
स्नेहेन पार्थस्य खगामिनोऽमी । समागतास्तत्र समग्रसैन्याः ॥ २८ ॥
इतश्च कर्णप्रमुखैर्नरेन्द्रः । सम्प्रेरितः श्रीगुरुधार्तराष्ट्रः ॥
आजूहवद्दूतमुखेन भूपान् । रणेच्छया स्वाभिमतान् क्षणेन ॥ २९ ॥
भूरिश्रवाख्यो भगदत्तशल्य–श्रीरङ्गभूभृच्छकुनिक्षितीशाः ॥
कृपागुरुश्रीभटिनीशताश्च–पर्णीशबाल्हीकनरेश्वराश्च ॥ ३० ॥
वृषासनश्रीकृतवर्मभूप–बलाहकेन्द्राभिधभूमिपालाः ॥
उलूकभूपप्रमुखाश्च दुर्यो–धनस्य सैन्ये ह्यमिलन्ननेकाः ॥ ३१ ॥
विज्ञाय चित्ते विदुरः स्वगोत्र–कदर्थनं तूर्णमुपागतं च ॥
वैराग्यरङ्गाचरणं जिनोक्त–मादाय कान्तारमगान्महात्मा ॥ ३२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निजांगजत्वं रथिजोऽपि कुन्त्या । विज्ञापितः सन्निजगाद चेच्छम् ॥
पूर्वं मया मातरिमे मदीयाः । प्राणाः प्रदत्ता हि सुयोधनाय ॥ ३३ ॥
मातस्ततस्तं परिहृत्य भूपं । भजाम्यहं चदितरं नरेन्द्रम् ॥
ततस्त्वमेवाद्य विजज्जसे हि । ममापवादो भवतीह लोके ॥ ३४ ॥
कुन्तीति कर्णस्य गिराथ कुन्तै—र्निपीडिताख्यत्किल पांडवेभ्यः ॥
सुवत्सलेऽस्मिन् जय आहते हा । माता यतः स्याद्धितकृन्नृणां हि ॥ ३५ ॥
प्रचण्डदोर्दण्डबलोद्धतोऽथ । दुर्योधनः प्रौढचमूपयुक्तः ॥
द्रुतप्रयाणैः प्रययौ प्रसिद्धं । कोपात्कुरुक्षेत्रमतिप्रमाणम् ॥ ३६ ॥
एकादशाक्षौहिणिभिर्नदीभिरिवाधिकं राजति यस्य सैन्यम् ॥
सिन्धुर्गजेन्द्राभगिरीन्द्रयुक्तं । सुवीर्ययोधोर्मिविराजमानम् ॥ ३७ ॥
दुर्योधनोऽथ प्रपितामहं श्री—गांगेयभूपं प्रणमन् प्रमोदात् ॥
सद्वीरकोटीरमथस्वसेना—पतिं चकार द्रुतमादरेण ॥ ३८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अक्षौहिणीभिः सह सप्तभिस्ते । श्रीपांडवाः क्षिप्रतरं चलन्तः ॥
प्रकम्पयन्तः क्षितिमात्मसैन्य—भारैः कुरुक्षेत्रमगुः सदर्पाः ॥ ३९ ॥

चमूपतित्वे बलिनं च धृष्ट—द्युम्नं नृपं श्रीद्रुपदात्मजातम् ॥
सर्वेषु धामप्रवरं प्रचक्रुः । श्रीपांडुपुत्राः सकलेष्टमाशु ॥ ४० ॥

निर्णीतसंग्रामदिने विधाय । देवार्चनं पाडवसैनिकाश्च ॥
समाद्ययुर्युद्धसमुत्सुका हि । रणांगणे वीर्यरसैः प्रणुन्नाः ॥ ४१ ॥

ते पूजयामासुरथादरेण । स्वक्षेत्रदेवं च निजायुधानि ॥
तत्रोद्यतानीव ततः प्रदातुं । स्वभर्तृषु प्रौढजयं यशश्च ॥ ४२ ॥

संग्रामतूर्याणि नदन्ति तत्र । कुर्वन्ति हेषां खलु वाजिनश्च ॥
मतङ्गजा गर्जनमेव बाढं । द्वयोरपि प्रोद्धतसैन्ययोश्च ॥ ४३ ॥

महीरुहाग्रेऽथ खगाः प्रकामं । नभोङ्गणे संव्यधुरुन्निनादम् ॥
महाभटानां रणकांक्षिकां च । प्रवर्धयन्तः किलसिंहनादम् ॥ ४४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सैन्यद्वयस्याथ तदा च युद्ध—तूर्याणि नेदुः सुतरां समन्तात् ॥
उद्यत्सहस्रांशुरथाश्वनाद—स्पर्धावशाद्वाजिवरा जिहेषुः ॥ ४५ ॥
रेजुर्नदन्तो घनवारणेन्द्रा । झरन्मदाम्भोभरपङ्किलेलाः ॥
वर्षासु वार्दा इव वैरिवार—यवासकश्रेणिविशोषिणश्च ॥ ४६ ॥
निःस्वानभेरीघनकाहलानां । हुडुक्कढक्कादिकवाद्यकानाम् ॥
स्वनैर्महापत्तिरथाश्वदन्ति—नादैर्जगन्नादमयं बभूव ॥ ४७ ॥
सुवर्णरत्नाद्भुतवर्मभाजः । स्फारकृपाणस्थितपाणयश्च ॥
उल्लालयन्तः फलकान् प्रसस्रुः । सर्वत्र योधा युधि जातबोधाः ॥ ४८ ॥
सुदुर्लभाश्चेलुरथो धनुर्धरा । द्राग्ध्यानयन्तः स्वशरासनं मुहुः ॥
अश्वा वरास्तत्पुरतश्च वल्गा—धरा बभूवुः समरोत्सुकाशया ॥ ४९ ॥
प्रौढस्फुरत्प्रस्वरधारिणः स—तुरङ्गमा लक्षमिताः प्रसस्रुः ॥
उत्तानशुण्डाग्रकराग्रजाग्रन्महार्गलातङ्ककरा गजाश्च ॥ ५० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षट्त्रिंशदुत्तेजितशस्त्रपूर्णाः । स्वस्पन्दनिष्पिष्टधरातलश्च ॥
सद्योऽभ्रमंस्तत्र महारथौघा । रणोत्सुकानेकभटाभिरामाः ॥ ५१ ॥

समुच्छलन्तिस्म पयोनिधेः स—त्पर्यासि सद्यः पृथुवेपनेन ॥
तदा प्रकामं शुषिरेषु पाद—पातादिव प्रौढचमूभरस्य ॥ ५२ ॥

समुल्लसद्वीररसप्रसारै—श्चलाचलैः सङ्गरतूर्यनादैः ॥
द्वयोस्तयोः सज्जितसैन्ययोश्चा—रेभे भटैरुद्भटशस्त्रशक्ति ॥ ५३ ॥

संघट्टभाजां रदिनां च कोपा—न्मिथो रदैः सद्रथिनां रथैश्च ॥
महाभटानां घनपादचारै-रन्योन्यमग्रैः समरोद्भवोऽभूत् ॥ ५४ ॥

उदायुधाः क्रोधभराः सघोषाः । स्वकीयवैरीषु च वर्मिणोऽपि ॥
दुष्प्राप्यरूपा जगतोऽथ जाता—स्तथा सहस्रांशुवदुज्ज्वलाश्च ॥ ५५ ॥

सन्नद्धकायास्तुरगाः स्वगत्या । समुच्छलन्तो वज्रवर्मयुक्ताः ॥
उच्चैरतर्क्यंत महाविपक्षै—रेवं सपक्षा इव भीतिभीतैः ॥ ५६ ॥

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

नक्रन्ति शस्त्राण्यखिलानि तत्र । महागजेन्द्राश्च महीधरन्ति ॥
महातरङ्गन्ति तुरङ्गमाश्च । सत्पत्तयो जीवनमानुषन्ति ॥ ५७ ॥
रथः प्रकामं मकरन्ति तत्रो—द्वेले महासङ्गरसागरेऽस्मिन् ॥
तथा विमानानि नभःस्थितानि । यानन्ति गर्जन्ति च हुंकृतानि ॥ ५८ ॥युग्मम्॥
प्रवृद्धमन्युस्त्वभिमन्युवीरः । सुस्यन्दनस्थः किल वैरिसैन्ये ॥
विवेश चण्डांशुरिव क्षणेन । निर्नाशयन् वैरिमहातमांसि ॥ ५९ ॥
अमोघबाणप्रकरैः प्रकोपा—त्तं संहरन्तं स्वदलं विलोक्य ॥
बृहद्बलश्रीकृपभूमिपाला—वधावतां मुक्तशरौ रथस्थौ ॥ ६० ॥
बृहद्बलस्याभिमुखं जगामा—र्जुनांगजस्तस्य सहायतायाम् ॥
सन्त्रासयन् वैरिवितानमस्त्रैः । प्राप द्रुतं कैकटराट् कृपं च ॥६१ ॥
उभावभूतामिह युद्ध्यमानौ । भयङ्करौ सर्वचमूभटानाम् ॥
विजृंभमाणौ विविधैश्च शस्त्रैः । कृपाणकुन्तोग्रशराकरैश्च ॥ ६२ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विजृंभिणः पार्थसुतस्य वायु--रिवाभितस्तत्र विमुक्तबाणैः ॥
चिच्छेद युद्धे रथकेतुमस्य । सूर्योग्रतेजाः स बृहद्बलश्च ॥ ६३ ॥
सुनिष्ठुरैः स्वीयरवैश्च गर्जन् । विदारयन् भूवलयं च चक्रैः ॥
आगादथो भीष्मरथो नरेन्द्र—श्रीधर्मसूनोः कटकं क्षणेन ॥ ६४ ॥

भीष्मप्रकोपात्तटिनीतनूजे । खे मंडपं कुर्वति दिव्यबाणैः ॥
चलाचलाभूत्रिपुराजसेना । क्षोभं प्रयाते खलु नौरिवाब्धौ ॥ ६४ ॥

क्रुद्धोऽभिमन्यू रभसेन शीर्षं । श्रीदुर्मुखस्य क्षितिनायकस्य ॥
गांगेयकेतुं च लुलाव तूर्णं—माच्छादयन् व्योम शरैरसंख्यैः ॥ ६५ ॥
क्रुद्धेऽथ भीष्मे रथिनो दशैवा--परे क्रुधा पांडवसैन्यमध्यात् ॥
उदायुधा रक्षितुमङ्गजातं । पार्थस्य युद्धे परिवव्रुराशु ॥ ६६ ॥
चीत्कारनादैश्च रथस्य भीमः । संक्षोभयन् वैरिगणांश्च युद्धे ॥
अथागमद्भीष्मनृपस्य बाणैः । संच्छिन्नकेतुस्त्वभिजातकोपः ॥ ६७ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

गदाप्रहारेण पितामहस्य । क्षणाद्रथं पर्वतवद्बभञ्ज ॥
भीमस्ततो भीष्मनृपः क्षणात्तं । शरैर्निरुच्छ्वासममुं चकार ॥ ६८ ॥
तथाविधं भीममसीमवीर्यं । दृष्ट्वार्जुनः कौरवसैन्यमुच्चैः ॥
द्राग् संहरन्नुग्ररथः कृतान्त—वद्भीष्मभूमीपतिमभ्यगाच्च ॥ ६९ ॥
विमुच्य भीमं प्रतितामहः प्राक् । मुमोच बाणानभिपार्थमुच्चैः ॥
तानन्तराले कपिकेतुराशु । चिच्छेद सूतं च रथध्वजं च ॥ ७० ॥
तयोर्महाघोररणं च तत्र । सुरासुराश्चर्यकरं बभूव ॥
सञ्जातहृत्संशयया परं नो । जयश्रिया कोऽपि वृतस्तदन्तः ॥ ७१ ॥
विनाशितस्यन्दनयुग्मयुग्मः । श्रीशालभूभृद् द्रुतमुत्तराय ॥
सुपर्णशक्तिं च मुमोच मायां—तरां तथाभूद्व्यसुरेष सद्यः ॥ ७२ ॥
कोपेन सेनापतिरेष धृष्ट—द्युम्नस्ततः सर्वबलेन तत्र ॥
दुर्योधनानीकमहापयोधिम् । ममन्थ मन्थानकशैलवद्धि ॥ ७३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ते पांडवाश्चाष्टमवासरेऽथ । न्यमन्त्रयन् सायमथो मिथो हि ॥
सेनापतिर्वैरिदलेऽतिभीष्मः । श्रीभीष्मभूपः स कथं च वध्यः ॥ ७४ ॥

हरिर्जगादेति ततः प्रतिज्ञा । भीष्मस्य चेयं भुवि विश्रुतास्ति ॥
षण्ढे निरस्त्रे च पराङ्मुखे च । स्त्रियां प्रहारं न करोमि चेति ॥ ७५ ॥

श्रीद्रौपदेयं कृतषण्ढरूपं । ततस्त्वमारोप्य रथे स्वकीये ॥
निरस्तशास्त्रं प्रहरेः प्रकामं । श्रीपार्थ भीष्मं तमशक्तितः सन् ॥ ७६ ॥

प्रपद्य सर्वं तदिति प्रभाते । सचक्रसेनासुभटाश्च सद्यः ॥
श्रीपांडुपुत्रा धृतराष्ट्रजाश्च । रणाङ्गणं प्रापुरमन्दवीर्याः ॥ ७७ ॥

नासीरसंस्थः सुरसिन्धुपुत्र—स्तथैव बाणैः करकैरिवाशु ॥
श्रीपांडुपुत्रान् शरभानिवोच्चै—स्तदोपदुद्राव पयोदवच्च ॥ ७८ ॥

षंढं समारोप्य रथे स्वकीये । पार्थोऽपि तूर्णं निशितैः शरौघैः ॥
गङ्गातनूजं रणकर्ममन्दं । तद्दर्शनेनाकृत जर्जराङ्गम् ॥ ७९ ॥

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

कपिध्वजस्यैव हि विश्वमर्म—भिदः शरा नैव शिखण्डिनश्च ॥
इति ब्रुवन्नेव स भीष्मभूपो । जहौ निजप्राणमथाशु विद्धः ॥ ८० ॥

ततः पुरस्कृत्य च धार्तराष्ट्रा—स्ते कर्णमत्युल्वणपौरुषाढ्यम् ॥
युयुत्सवः सज्जितसर्वशस्त्रा । रणाङ्गणान्तर्ययुरादरेण ॥ ८१ ॥

तयोर्द्वयोर्दुर्जयसैन्ययोश्च । महाहवोऽभूद्भटकोटिघाती ॥
सुदुस्सहः सर्वजगज्जनानां । दुर्भेदरूपः सुतरां मिथश्च ॥ ८२ ॥

कर्णान्तिकानीतशरासनोद्य—द्गुणस्तु कर्णोऽर्णवसन्निनादः ॥
वाताभ्रवित्रस्तसमस्तवैरि—वर्गः पपात प्रथमं रणेऽस्मिन् ॥ ८३ ॥

प्रसारयेत् स्वीयकराननेकान् । विष्वग्यथा शीतमथोऽथ भानुः ॥
शरान् क्षिपन् वैरिषु तत्समोऽभू—त्तस्यात्मजत्वेन तदा स कर्णः ॥ ८४ ॥

परस्परं श्रीकपिकेतुकर्णा—वथो भटौ तुल्यभुजोग्रवीर्यौ ॥
शिलीमुखैस्तीक्ष्णकरैरिवार्कौ । प्रयुध्यतःस्म प्रलयोद्भवौ च ॥ ८५ ॥



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

प्राक्कोपकम्प्रः पवनात्मजोऽप्य—रौत्सीत्तु दुःशासनमाशु वीरम् ॥
निपात्य तं क्षोणितले तदीयौ । भुजावुभौ द्रागुदपाटयच्च ॥ ८६ ॥

संवीक्ष्य दुःशासनदेहरक्तै—रक्तां भुवं भूरितमां वितन्वन् ॥
धामम्यथार्कः किल रक्तवर्णां । शिश्राय कष्टामिह वारुणीं ताम् ॥ ८७ ॥

प्रातस्ततः पार्थवधाभिलाषी । विधाय शल्यं निजसारथिं च ॥
गर्जन् भृशं शंखनिनाददंभा—दथासवान् युद्धभुवं स कर्णः ॥ ८८ ॥

क्ष्मायां दिशि व्योम्नि च वैरिकाल—शिलीमुखानां परितो वितानाः ॥
तयोरलक्ष्यन्त जनैः पयो—दधारा इवानन्यमहौजसोश्च ॥ ८९ ॥

गभस्तिभूमुक्तसरीसृपौघान् । धनञ्जयो गारुडसायकेन ॥
न्यवारयत्सर्वसुमन्त्रजात—प्रत्यस्त्रवारैरपराण्यपीति ॥ ९० ॥

प्राग्दत्तवाक्पन्नगराजशक्त्या । जघान कर्णं कपिकेतुराशु ॥
महार्णवाभ्यर्णगते दिनेशे । कृतामरैस्तत्र सुपुष्पवृष्टिः ॥ ९१ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्राप्ताः पुनः शल्यनृपं च सेना—पतिं विधाय द्रुतमाह्वयान्तः ॥
ततो निरुत्साहहृदः समागु—स्ते धार्तराष्ट्राश्च मृतावशिष्टाः ॥ ९२ ॥

शल्ये विमुञ्चत्यरिचित्तशल्ये । शरानमोघान् परितो रणांतः ॥
एकोऽभवत्तत्र युधि स्थिरात्मा । युधिष्ठिरः पुण्यगणप्रकृष्टः ॥ ९३ ॥

कोपाकुलः श्रीसहदेववीरः । क्रुद्धं पुरस्ताच्छकुनिनरेन्द्रम् ॥
रुरोध सद्यः शरमण्डलेन । प्रपूरयन् सर्वनभोऽङ्गणं च ॥ ९४ ॥

स्मरन् स्वचित्ते विदुरस्य वाचं । विनाशवैरं किल धर्मपुत्रः ॥
अमोघशक्त्या सफलप्रकोपा—ज्जघान शल्यं निजसैन्यशल्यम् ॥ ९५ ॥

स्वकर्मलज्जावशतोऽतिभीरु—रस्तं प्रयाते किल घर्मरश्मौ ॥
सुयोधनः क्षोणिपतिर्भयेन । नष्ट्वा विवेशाशु सरोन्तराले ॥ ९६ ॥

कृपक्ष्माभृत्कृतवर्मकाश्व—त्थामादयस्तत्र विलोकयन्तः ॥
पदानुसारेण समागताः श्री—दुर्योधनं यावदिमे वदन्ति ॥ ९७ ॥



© Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्पृष्ठगास्तावदतीव वेगा—त्तत्रागताः पांडुनरेन्द्रपुत्राः ॥
सरस्तदावेष्ट्य किलैकयाक्षौ—हिण्या जगुर्वारितिरोहितं तम् ॥ ९८ ॥
युक्तं न ते वीरशिरोमणे श्री—दुर्योधनक्ष्माप पलायनं हि ॥
लज्जाकरं स्यादिह यत्कुलस्य । तत्संकटेऽपि क्रियते न सद्भिः ॥ ९९ ॥
किं शक्यते स्थातुमिह त्वया वा । रुष्टे सति श्रीकपिकेतुवीरे ॥
विद्याशरैः शोषयितुं समर्थो—ऽसौ वारिधिं तत्पुरतः सरः किम् ॥ १०० ॥
नालं भवेस्त्वं सकलैर्नियोध्धु—मेकेन केनापि च बन्धुना त्वम् ॥
युध्यस्व तच्चित्तसमीहितेन । युध्धेन बुध्यस्व ततः स्वयं च ॥ १०१ ॥
एवं निशम्याथ सुयोधनो द्राग् । जगौ मनस्वीधृतभूरिसत्वः ॥
गदायुधेनाहमहो नियोत्स्ये । सुदोष्मता भीमभटेन साकम् ॥ २ ॥
श्रीपांडुपुत्रै रभसात्तदङ्गी—कुर्वद्भिरेतैः सरसोऽथ तस्मात् ॥
तत्कालमाविर्भवतिस्म वारि—चारीव वेगेन जयाशया सः ॥ ३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परेषु सर्वेषु रणेऽत्र सभ्यी—भूय स्थितेषूद्धतदोर्बलौ तौ ॥
अधावतां योद्धुमलं गदाभ्यां । दुर्योधनश्रीपवनांगजातौ ॥ ४ ॥
तौ वञ्चयन्तावितरेतरं स्म—द्गदाप्रहारानखिलान् समन्तात् ॥
कोपारुणास्यौ द्युसदामपीमौ । दुःप्रेक्ष्यरूपौ सुतरामभूताम् ॥ ५ ॥
कोपादथोत्पातविधिप्रवीणो । निहत्य भीमो गदया पदोस्तम् ॥
दुर्योधनं क्षोणितले रयेण । न्यपातयद् वृक्षमिव प्रचण्डम् ॥ ६ ॥
वसुन्धरायां पतितस्य तस्य । भीमस्तु मौलिं निजपादघातैः ॥
अचूर्णयच्चानुचितं विलोक्य । तच्चेतसि क्रोधमवाप रामः ॥ ७ ॥
पित्रादिभीत्याथ च पांडुपुत्रान् । कोपं दधानः स्वहृदि प्रकामम् ॥
नोवाच किञ्चिन्मुखतस्तथापि । विनिर्ययौ क्वापि बलो हि खिन्नः ॥ ८ ॥
स्वसैन्यरक्षाकृतयेऽथ तेऽपि । श्रीद्रौपदेयं च शिखण्डिनं च ॥
नियुज्य कृष्णानुगताः क्षणेन । ययुर्बलं सांत्वयितुं विधिज्ञाः ॥ ९ ॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

अयोऽप्यमी श्रीकृतवर्मभूपा—श्वत्थामविप्रेन्द्रकृपाभिधानाः ॥
सुयोधनं द्रष्टुमथो हि ताव—दुपाययुर्दीनमुखा रणोर्वीम् ॥ १० ॥
तथाविधं तं च निरीक्ष्य निन्दं—तः स्वं नरेन्द्रं जगुरादरात्ते ॥
स्वामिन् प्रसीदादिश नोऽथ येना—द्यापि द्रुतं पांडुसुतान्निहन्मः ॥ ११ ॥
तेषां च तद्वाक्यमथो निशम्य । हृष्टाशयः श्रीगुरुधार्तराष्ट्रः ॥
तान् संस्पृशन् पाणितलेन तूर्णं । निसृष्टवांस्तन्निधनाय कोपात् ॥ १२ ॥
गत्वाथ शून्ये कटके किलैते । शिखण्डिभूपद्रुपदात्मजौ च ॥
चिरेण युध्ध्वा च निहत्य पांडु—पुत्रभ्रमेणापि च पांडवेयान् ॥ १३ ॥
ततः समानीय शिरांसि तेषां । सुयोधनाग्रे ह्यमुचन्नथामी ॥
विज्ञाय तानीह तदा शिशूनां । विखिन्नचित्तः पुनराह तेषाम् ॥ १४ ॥
धिक् धिक् शिशूनां हि शिरांसि किन्त्वा—नीतानि युष्माभिरहो ममाग्रे ॥
भाग्यानि तादृंशि न मे हि सन्ति । यैः पांडवानां निधनं भवेद्गोः ॥ १५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्युच्चरन्नेव स वेदनार्त्तः । सुयोधनः क्षिप्रमवाप मृत्युम् ॥
विलज्जितास्ते हि कृपादयोपि । जग्मुः क्वचिच्छोकनिमग्नचित्ताः ॥ १६ ॥
इतोऽनुकूल्यैः स्वकभक्तिवाक्यैः । श्रीरौहिणेयं किल पांडुपुत्राः ॥
प्राप्ताः स्वसैन्ये स्वसुताम् हतांश्च । मत्वातिशोकं दधुरात्मचित्ते ॥ १७ ॥
तेषां तथा श्रीधृतराष्ट्रजानां । तथा परेषां नृपपुंगवानाम् ॥
सरस्वतीशैवलिनीसमीपे । तैः प्रेतकार्याणि च चक्रिरे द्राग् ॥ १८ ॥
संतुष्टचित्तैरथ रामकृष्णा--दिभिर्दशाहीनुमतैः सबन्धुः ॥
श्रीधर्मपुत्रः स्वकहस्तिनाग--पुरेऽभिषिक्तः पुनरुत्सवेन ॥ १९ ॥

दोर्दण्डार्जितविश्ववैरिविजयान् श्रीद्रोणगङ्गाभव—
श्रीकर्णादिनृपान् विजित्य समरे श्रीकौरवाणां बलात् ॥
निर्मथ्यामितसैन्यसागरमलं जाता जयश्रीवराः ।
साम्राज्यं परितन्वति निजपुरे पश्चापि ते पांडवाः ॥ २० ॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

इति तपागच्छाधिराजश्रीसोमसुन्दरसूरिसन्ताने सकलवाचनाचार्यचक्रमण्डलिशिरोमणि-
पण्डितश्रीसाधुविजयगणिशिष्यपरमाणुपण्डितश्रीशुभवर्धनगणिविरचिते-
पांडवचरित्रे महाकाव्ये श्रीकौरवादिक्षयश्रीपांडवजयभवनपु-
नाराज्योपवेशननामषष्ठः सर्गः समाप्तः ॥श्रीरस्तु॥

## ॥ अथ सप्तमः सर्गः प्रारभ्यते ॥

सम्प्राप्तसाम्राज्यसमग्रलाभाः । श्रीपांडवाः खण्डितवैरिदन्ताः ॥
अथोल्लसन्नीतिबलेन नित्यं । प्रजाः स्वकीयाः परिपालयन्ति ॥ १ ॥
अथान्यदा श्रीजिनधर्ममर्म—विद्धर्मपुत्रः सुपवित्रगात्रः ॥
जाताघभीतिर्निजबान्धवेभ्यः । सदा हितैषीति जगाद सद्यः ॥ २ ॥
पांडुः पिता नस्त्रिदशोऽथ भूत्वा—गत्यावदद् ह्योदिवसे ममेति ॥
वत्सा भवद्भिर्निजगोत्रघाता—दिकं महापापमकारि घोरम् ॥ ३ ॥

P. P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्पापपूराद्भवतामनन्त—दुःखप्रपूर्णे नरके प्रपात ॥
भावी ततो मे मनसीति चिन्ता । सुता भविष्यन्त्यतिदुःखिनो धिक् ॥ ४ ॥
तद्ज्ञापनायेति समागमं च । तत्पापशान्त्यै कुरुताशु धर्मम् ॥
कृतेन येनाथ तमोहरेण । न स्यात प्रपातो नरकावटे वः ॥ ५ ॥

ततः समुत्पन्नभयेन पृष्टं । मयेति कः सोऽस्ति पितुर्विशुद्धः ॥
धर्मोऽघहन्ता किल येन न स्याद् । दुःखप्रदे नो नरके प्रपातः ॥ ६ ॥

स्नेहात्ततः प्राह च पांडुदेवः । सुता जिनोक्तः करुणाप्रधानः ॥
धर्मो जगज्जन्तुहितः समस्त—दुःखार्णवोद्धारविधौ समर्थः ॥ ७ ॥
यतीश्वरश्राद्धविभेदतः स । द्विधार्हतोक्तः खलु सौख्यहेतुः ॥
गुप्तित्रयं पञ्चमहाव्रतानि । धर्मः स साधोः समितियुतश्च ॥ ८ ॥
सम्यक् तदाराधनतो यतीना—मुत्कृष्टतः स्यात्फलमेष मोक्षः ॥
जघन्यतः स्वर्गसमग्रलक्ष्मी—फलं भवेच्छुद्धतमक्रियाणाम् ॥ ९ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चतुस्त्रिपञ्चप्रमितात्मशिक्षा—गुणाणुरूपव्रतभेदरूपः ॥
सुश्राद्धधर्मोऽपि च देवलोक—सौख्यप्रदः स्यादपरो विशुद्धः ॥ १० ॥
ततोऽधुना पापभरापहारी । सुश्राद्धधर्मः क्रियतां भवद्भिः ॥
प्राप्ते तपस्यासमयेऽथ कार्यः । सुसाधुधर्मः किल शुद्धभावात् ॥ ११ ॥
कक्षीकृतेऽस्मिंश्च मयाथ पांडु—देवोऽगमत्तुष्टमनाः पदं स्वम् ॥
ततः कुरुध्वं जिनराजधर्मं । पित्रोदितं पापविनाशनाय ॥ १२ ॥
ज्येष्ठस्य बन्धोर्द्रुतमायतिश्री—करं हरं सर्वतमोभराणाम् ॥
निशम्य वाक्यं किल भीममुख्याः । कुर्वन्ति पुण्यं शिवसौख्यकारि ॥ १३ ॥
पश्चापि ते श्रावकशुद्धधर्म—पराः पराक्षोभ्यतरस्वभावाः ॥
विनश्वरां लोलतमां च लक्ष्मीं । मत्वाथ दाने सुमतिं च चक्रुः ॥ १४ ॥
क्षेत्रेषु सप्तस्वपि सद्विहारा । जैनाः प्रतिग्राममतिप्रमाणाः ॥
तैः कारिता लक्षमितानि जैन—बिम्बानि रूप्यादिमयानि चेह ॥ १५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ते लेखयन्तिस्म जिनोक्तशास्त्र—सत्पुस्तकानि स्वककर्मशुद्धयै ॥
भक्तिं प्रचक्रुश्च चतुर्विधस्य । संघस्य वस्त्राशनमुख्यभावैः ॥ १६ ॥
शुद्धाशनाद्यैर्बहुपात्रपोषं दीनोद्धृतिं च द्रविणैरगण्यैः ॥
उद्घोषणापूर्वमथ स्वकीय—देशेष्वमारिं किल कारयन्ति ॥ १७ ॥
द्यूतादिसप्तव्यसनानि लोके । ततो महद्दुर्गतिदुःखदानि ॥
निषेधयन्तिस्म जिनालयेषु । पूजादिकृत्यानि च ते च कुर्युः ॥ १८ ॥
शत्रुंजयादौ वरतीर्थमुख्ये । जिनेन्द्रयात्राकरणेन तावत् ॥
क्षयं जनानाममलाशयानां । हत्यादिपापान्यखिलानि यांति ॥ १९ ॥
गुरोर्मुखादित्यवधार्य सद्य—स्ते पांडवाः स्वं मलिनं च मत्वा ॥
यात्राकृते तत्र विशेषतश्चो—त्साहं प्रकुर्वन्ति विचारपूर्वम् ॥ २० ॥
दशार्हरामाच्युतमुख्यराज्ञा । ततः समाह्वानकृते स्वदूताः ॥
सम्प्रेषितास्तैरथ तीर्थयात्रा—कृते समागुः क्षितिपा अनेके ॥ २१ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततो गृहीत्वा मिलतामितश्री—संघं चतुर्भेदममन्दभावाः ॥
श्रीपुण्डरीकाचलतीर्थयात्रा—कृतेऽथ चेलुः किल पांडवास्ते ॥ २२ ॥
पुरे पुरे जैनविहारवाराः । समुद्ध्रियन्तेऽध्वनि तैरुदाराः ॥
नानाप्रकाराणि च याचकेभ्यो । दानान्यदीयन्त दयार्द्रचित्तैः ॥ २३ ॥
विशुद्धभावेन चतुर्विधस्य । संघस्य भक्तिं वसनाशनाद्यैः ॥
कुर्वन्ति ते स्नात्रमहांश्च देवा—लयेषु रूप्यादिमयेषु नित्यम् ॥ २४ ॥
गायन्ति गीतानि गणा जनानां । नृत्यन्ति पात्राणि जिनालयेषु ॥
वाद्यान्यसंख्यानि च वादयन्ति । मुदा सदा भावभृतोऽत्र संघे ॥ २५ ॥
सुखासनस्थाः किल केऽपि दिव्य—गजाश्रिताः केऽपि तुरङ्गमस्थाः ॥
पदचारिणः केऽपि जिनार्चनेषु । समुत्सुकास्तत्र चलन्ति लोकाः ॥ २६ ॥
शत्रुंजयाद्रेस्तलहट्टिकायां । संघः समागात्सुमहैः क्रमेण ॥
दृष्ट्वैनमद्रिं च जहर्ष सोऽपि । तथा यथा सर्वविदेव वेद ॥ २७ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ततो दशार्हैर्बलकेशवाभ्यां । सहाभिषेकः क्रियते सुलग्ने ॥
संघाधिपत्यस्य सबांधवस्य । श्रीधर्मपुत्रस्य महामहेन ॥ २८ ॥
ततः प्रभाते विमलाचलं तं । समस्तसंघेन स संघनेता ॥
आरोहति प्राक्तनकर्मनाशं । पदे पदेऽसौ तनुते प्रकामम् ॥ २९ ॥
क्रमेण तीर्थाधिपतेर्विहार*—द्वारि प्रमोदेन जगाम संघः ॥
दृष्ट्वा जिनं केऽपि लुठन्ति भूमौ । नृत्यन्ति केचिद्घनमुच्छलन्ति ॥ ३० ॥
अघौघघाताय च सर्वसंघ—लोकः प्रकामं जिनमादिदेवम् ॥
पूर्वं समुत्पन्नमुदा सुगन्ध—पुष्पादिभिः पूजयतिस्म भक्त्या ॥ ३१ ॥
प्रातस्ततः सङ्घजनैरुपेतः । सङ्घाधिपः स्नात्रमहं व्यधात्तम् ॥
विलोकितुं यं त्रिदशाः समग्रा—स्ततो हि जानेऽनिमिषा बभूवुः ॥ ३२ ॥
आरात्रिकं मङ्गलदीपकं च । मुदा ध्वजारोपमथो विधाय ॥
दीनादिदानानि तथा प्रदायो—त्ततार शैलान् मुदिताशयः सः ॥ ३३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संघं समस्तं परिपोष्य भोज्य—वस्त्रादिभिः श्रीहरिराममुख्यम् ॥
सबन्धुरायोज्य करौ स धर्म—जन्मा मुदा विज्ञपयत्यदः प्राक् ॥ ३४ ॥
प्रजाः समस्ताः शृणुतास्मदीयं । वाक्यं भवद्भिर्यदि कथ्यतेऽत्र ॥
अथोध्धृतिं सम्प्रति कारयामि । तीर्थावतंसे विमलाचले तत् ॥ ३५ ॥
श्रीरामकृष्णप्रमुखैस्तु सङ्घ—लोकैः समस्तैरपि हृष्टचित्तैः ॥
तस्य प्रदत्तानुमतिस्ततोऽसौ । स्वसिद्धकार्यैः सुतरां जहर्ष ॥ ३६ ॥
स्वासंख्यवित्तव्ययतो विहारो—द्धारं ततोऽल्पैर्दिवसैर्विदध्रुः ॥
ते पांडवास्तत्र सुगन्धभावै—श्चक्रुः पुनर्लैप्यमयीं जिनार्चाम् ॥३७॥
तत्र प्रतिष्ठां वरदत्तनाम—गणेश्वरेणोत्सवपूर्वमेते ॥
वितन्वते भूरिधनव्ययेन । सुरासुराश्चर्यकरीं गरिष्ठाम् ॥ ३८ ॥
श्रीरैवताद्रावथ नेमिनाथं । चन्द्रप्रभं देवकपत्तने च ॥
श्रीसुव्रतं श्रीभृगुकच्छके च । सोपारके नाभितनूजदेवम् ॥ ३९ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

प्रणम्य पूजादिविधानपूर्वं । श्रीधर्मजन्मा सहसङ्घलोकः ॥
श्रीद्वारिकायां पुरि सन्निभायां । स्वर्गस्य सम्प्राप महामहेन ॥ ४० ॥ युग्मम् ॥

श्रीकामपालाच्युतमुख्यभूपैः । संघेन सार्धं किल पांडवानाम् ॥
व्यधायि नानाविधवस्त्रभूषा—दिव्याशनाद्यैरिह भूरिभक्तिः ॥ ४१ ॥

ततः कियद्भिर्दिवसैः ससङ्घः । श्रीधर्मसूनुर्घनपुण्यपुण्यः ॥
शृङ्गारिते स्वीयपुरे स बन्धु—महोत्सवैर्भूरितरैरवाप ॥ ४२ ॥

नानाविधाहारसुवर्णरत्ना—लङ्कारसारांबरवारदानैः ॥
सङ्घस्य भक्तिं विविधां विधाय । युधिष्ठिरस्तं व्यसृजत्क्रमेण ॥ ४३ ॥

यात्राकृतिप्रास्तसमस्तपापा—स्ते पांडवाः प्राप्तयशःप्रतापाः ॥
ततः प्रकुर्वन्ति सुरेन्द्रराज्य—प्राज्यं च साम्राज्यमतीव रम्यम् ॥ ४४ ॥

कुर्वत्सु साम्राज्यममीषु लोकाः । शोकोज्झिताः स्वर्गिसमा बभूवुः ॥
ग्रामास्तु सर्वे सुरलोकशोभां । सदा दधानाः सुखिनश्च जाताः ॥ ४५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नेतिर्न दुर्भिक्षमथ स्वराष्ट्र—भीतिस्तथा नो परचक्रभीतिः ॥
नाकालमृत्युश्च भवन्त्यमूनि । कदापि लोकेषु न येषु सत्सु ॥ ४६ ॥
स्वमण्डलेभ्यः किल यैरनीति—कुकामिनीयं परिवासितोच्चैः ॥
तथा यथा तद्रिपुराजदेशान् । शिश्राय सेर्ष्याकुलितेव सद्यः ॥ ४७ ॥
कुर्वत्सु राज्यं खलु येषु सत्सु । विमुच्य तद्देशनिवासिलोकान् ॥
गता रिपूणां खलु देशभागे । संक्षुब्धचित्ताः परमोषिणश्च ॥ ४८ ॥

संख्यातीतधनव्ययेन सुभगां यात्रां च शत्रुञ्जये । तीर्थोद्धारमथो विधाय विविधाश्चर्यप्रदैरुत्सवैः ॥
श्रीसङ्घस्य चतुर्विधस्य विविधां भक्तिं च कृत्वा पुनः । संप्राप्ताः स्वपुरे तु पांडुतनयाः कुर्वंति पुण्योत्सवं ॥

इति तपागच्छाधिराजश्रीसोमसुन्दरसूरिसन्ताने सकलवाचनाचार्यचक्रमण्डलिशिरोमणि-
पण्डितश्रीसाधुविजयगणिशिष्यपरमाणुपण्डितश्रीशुभवर्धनगणिभिर्विरचिते
पांडवचरित्रे महाकाव्ये शत्रुञ्जययात्रातीर्थोद्धारकरणादिपुण्य-
विधाननाम सप्तमः सर्गः समाप्तः॥श्रीरस्तु ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ अथाष्टमः सर्गः प्रारभ्यते ॥

सहोदरैः सार्धमथान्यदा श्री—धर्माङ्गजे संसदि सन्निषण्णे ॥
परिभ्रमन् भूवलये समस्ते । श्रीनारदर्षिः सहसा जगाम ॥ १ ॥
नानाविधां भक्तिमथो विधाय । श्रीपाडुपुत्रैर्मुदिताशयैस्तैः ॥
सन्तोषमासादित एवमुच्चै—रालापितोऽसौ श्रमणावतंसः ॥ २ ॥
मुनीश के के विषया भवद्भिः । पवित्रिताः पादरजोभरेण ॥
सम्प्रापिता भूरितरं प्रमोदं । के के नरेन्द्रा निजवाग्विलासैः ॥ ३ ॥
सर्वत्र देशेषु परिभ्रमद्भि—र्भवद्भिराश्चर्यममन्दमार्य ॥
व्यलोकि किं किं भवतां च कापि । व्यथामितासौख्यकरी न वास्ति ॥ ४ ॥
मुनिर्निशम्येति जगाद हृष्ट—चेता अहो पांडुनरेन्द्रपुत्राः ॥
दृष्टा मया सद्विषया ह्यनेके । श्रियास्ति तुल्यो विषयो हि नान्यः ॥ ५ ॥
सन्त्यत्र भूमौ विविधा नरेन्द्रा । दोर्दण्डखण्डिकृतवैरिवृन्दाः ॥
धर्मश्रिया शुद्धनयश्रिया वा । युष्मत्समः कोऽपि नृपो न दृष्टः ॥ ६ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दृष्टानि सर्वत्र कुतूहलानि । नानाविधानि भ्रमता मयेह ॥
युष्मच्चरित्रादपरं किमस्ति । मनोहरं चित्रमहो जनानाम् ॥ ७ ॥
जिनोक्तधर्मोद्यतमानसैश्च । बाह्यान्तरङ्गाणि भवद्भिरुच्चैः ॥
विघ्नान्यशेषाणि विनाशितानि । कुतोऽन्यथा नो भवतीह भूपाः ॥ ८ ॥
प्रोच्यैवमुत्थाय ततस्तदन्तः—पुरं मुनीन्द्रः सहसा जगाम ॥
विशुद्धशीलव्रतधारकाणां । यन्नारदानां स्खलनं भवेत् क्व ॥ ९ ॥
कृष्णा तमायान्तमथो विलोक्य । व्यचिन्तयच्चेतसि चेति नूनम् ॥
कुलिङ्गिनां हि प्रतिपत्तिमुच्चैः । कृता स्वधर्मं मलिनीकरोति ॥ १० ॥
ततो विचार्येति तया न कापि । विनिर्मिता सत्प्रतिपत्तिरस्य ॥
ततोऽतिरुष्टः स जगाम जैन—धर्मोज्झितानां सुलभः प्रकोपः ॥ ११ ॥
विचिन्तयत्येष महानमुष्या—श्चित्ते महानर्थकरः प्रकामम् ॥
गर्वः श्रियां भूरिपराक्रमौकः—स्ववल्लभानां च समस्ति नूनम् ॥ १२ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

निराकरिष्यामि ततोऽहमस्या । गर्वं समुत्प्लुत्य ततो मुनीन्द्रः ॥
स धातकीखण्डगतेऽमरादि—कङ्कापुरि श्रीभरते जगाम ॥ १३ ॥

तत्रास्ति पद्मोत्तरनामभूपः । स्त्रीलोलचेता भुजवीर्यवर्यः ॥
तपोधनोऽसौ सहसा सभायां । समागमत्तस्य नरेश्वरस्य ॥ १४ ॥

दत्वासनं स्वागतपृच्छनादि । कृत्वा च सन्तोष्य फलाशनाद्यैः ॥
तपोधनं तं परिपृच्छतिस्म । सुविस्मितः क्षोणिपतिर्मुदैवम् ॥ १५ ॥

अन्तःपुराणि भवता भ्रमता नृपाणां । नानाविधानि विधिना च विलोकितानि ॥
कस्यापि भूमिरमणस्य ममावरोध—रूपोपमं क्वचन दृष्टमिदं मुनीश ॥ १६ ॥

स्मित्वाथ किञ्चिन्मुनिराह भूप । त्वं कूपमंडूकसमोऽसि नूनम् ॥
यदीदृशोऽपि क्षितिपावरोधे । ते मानसेऽखर्वतमोऽस्ति गर्वः ॥ १७ ॥

एतस्य तुल्यं भरतस्य जम्बू—द्वीपस्थितं श्रीभरतं समस्ति ॥
श्रीपांडवाः पञ्च च हस्तिनाग—पुरे प्रचण्डाः किल सन्ति तत्र ॥ १८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेषां नृपाणामवरोधमध्ये । या द्रौपदीनाम कलत्रमस्ति ॥
त्रैलोक्यनार्यः सकलास्तदीय—सादृश्यभावं परितन्वते न ॥ १९ ॥

कलिप्रियोऽसौ मुनिरेवमुक्त्वा । स्वच्छन्दचारो गगने जगाम ॥
तद्रूपमत्यद्भुतमेष राजा । श्रुत्वाभवत्काममनङ्गतप्तः ॥ २० ॥

तत्कार्यसिद्ध्यै त्रिदशं च कञ्चि—दसौ समराधयतिस्म भक्त्या ॥
दिनैः कियद्भिः स च कल्पितार्थ—स्तुष्टोऽवदत्तं च वरं वृणीथाः ॥ २१ ॥

जगाद भूमान्मुदितः प्रकामं । तां द्रौपदीमानय दिव्यरूपाम् ॥
देवोऽवदन्मूढ किमर्थमेतां । महासतीमानयसीह तूर्णम् ॥ २२ ॥

सुरासुरेन्द्रा अपि नैव यस्याः । शीलव्रतं खण्डितुमीश्वराः स्युः ॥
भूमीपते कीटकसन्निभस्त्वं । कियांस्तदग्रे त्यज तत्तदाशाम् ॥ २३ ॥

कदाग्रहं तं न यदा क्ष्माभृ—न्मुञ्चत्ययं मूढतयातिरागी ॥
वचोनिबद्धेन सुरेण तेना—नीता द्रुतं तत्र च याज्ञसेनी ॥ २४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समग्रनारीगणरूपगर्वा—पहारदक्षां द्रुपदात्मजां ताम् ॥
स्वं सिद्धकार्यं किल मन्यमानो । दृष्ट्वाथ राजा सुतरां जहर्ष ॥ २५ ॥

इतश्च ते पांडुसुताः प्रभाते । स्ववल्लभां तामविलोक्यगेहे ॥
ततो भृशं व्याकुलमानसा हि । देशेषु सर्वत्र विलोकयन्ति ॥ २६ ॥

ग्रामे पुरेऽरण्यमहानिकुञ्जे । शैलेषु सर्वासु नदीगुहासु ॥
सर्वत्र सा तैश्च विलोकितापि । न क्वापि दृष्टा सुरवल्लरीव ॥ २७ ॥

ततोऽतिदुःखाकुलिताशयास्ते । मिथः प्रकामं परिचिन्तयन्ति ॥
न ज्ञायते केन सुरेण विद्या—धरेण वा क्वापि हृता प्रिया नः ॥ २८ ॥

समग्रशक्तिप्रबलं यदूनां । पतिं विना श्रीद्रुपदात्मजायाः ॥
शुद्धिः समग्रा न हि भाविनी न—स्ततो व्रजामः किल तत्समीपम् ॥ २९ ॥

ततो विमृश्येति विखिन्नचित्ता—स्ते पांडवाः कृष्णमुपाययुश्च ॥
चिन्ताप्रयुक्तान् किल तान् विलोक्य । संभ्रान्तचेता हरिमेवमाह ॥ ३० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लोकोत्तरौजोभरधारिणां वः । सम्भाव्यते वैरिपराभवो न ॥
का नाम चिन्ता भवतां तदस्ति । ययार्त्तिरेवं खलु दृश्यतेऽद्य ॥ ३१ ॥
प्रियापहाराधिकजातलज्जा । नम्रानना: पांडुसुतास्तदग्रे ॥
कृष्णास्वरूपं कथयन्ति सम्यग्—यतः स्वभावे कथिते च सिद्धिः ॥ ३२ ॥
विज्ञाय कृष्णापहृतिस्वरूपं । तदास्यतः खिन्नमना मुकुन्दः ॥
विचिन्तयत्यात्महृदीह याव—त्तावत्समागात्किल नारदर्षिः ॥ ३३ ॥
चिन्तातुरत्वेन तदा स्वकीया—ऽविज्ञातसत्यागमनं रमेशम् ॥
तपोधनेन्द्रः स जगाद सद्य—श्चिन्तास्ति का पुण्यजनोचिता ते ॥ ३४ ॥
श्रुत्वेत्यथो विष्णुरवग्मुनीश । सर्वत्र विश्वे भ्रमतः सतस्ते ॥
क्काप्यागमद् दृष्टिपथं च कृष्णा । श्रुत्वेन्यवक् चक्रधरं शमीशः ॥ ३५ ॥
द्वीपे द्वितीये भरतस्थितायां । पुर्यां मुकुन्दामरकंकिकायाम् ॥
पद्मोत्तरान्तःपुरके व्यलोकि । कृष्णासमा कापि मया मृगाक्षी ॥ ३६ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

तदा मया चिन्तितमेतदेषा । श्रीपांडवानां दयिता कुतोऽत्र ॥
समागता किश्च पुनर्विमृष्टं । कृष्णा न चैषा ह्यपरा न काचित् ॥ ३७ ॥
जनार्दन त्वत्परिपृच्छनान्मे । सुनिर्णयोऽभून्मनसीति गाढम् ॥
सा द्रौपदी चैव ततस्त्वया तत् । कार्यं स्वचित्ते प्रतिभासते यत् ॥ ३८ ॥
उक्त्वेति सद्यः स च नारदर्षि—र्जगाम पक्षीव कलिप्रियः खे ॥
हरिर्जगौ पांडुसुतानिहैवं । हे बाधवा ब्रूत करिष्यते किम् ॥ ३९ ॥
द्वीपो द्वितीयः क च स द्विलक्ष—स्वर्योजनांतर्लवणाब्ध्यगम्यः ॥
वयं पुनर्भूमिचराः प्रकामं । कृत्यं ततोऽसाध्यमिदं हि जातम् ॥ ४० ॥
असाध्यमेतद्भवता विनैव । न शक्यते साधयितुं च कृत्यम् ॥
परैः समर्थैरपि यादवेन्द्र । श्रीपांडवाः प्राहुरिदं तदग्रे ॥ ४१ ॥
हरिः सगर्वः पुनराह वत्साः । स्वच्छाशयास्तिष्ठत तिष्ठताहो ॥
कार्यं गरीयस्तरमेतदेवं । कार्यं मया कष्टकरैरुपायैः ॥ ४२ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्कालमुक्त्वेति हरिः समुद्रा—धिष्ठातृदेवं मनसीह कृत्वा ॥
मुक्ताशनः श्रीजिनराजपूजा—पूर्वं कुशास्तरमारुरोह ॥ ४३ ॥

ततस्तदेकाग्रतया स्वपुण्य—प्राग्भारयोगाच्च दिने तृतीये ॥
प्रत्यक्षतामेत्य समुद्रदेवः । प्राहाच्युतं तं च वरं वृणीष्व ॥ ४४ ॥

द्वीपे द्वितीयेऽमरकङ्किकायां । पुर्यां नय त्वं सह पांडुजैर्माम् ॥
पद्मोत्तरं भूमिपतिं निहत्य । यथा हि कृष्णामहमानयामि ॥ ४५ ॥

देवोऽवदन्मेऽतिशयेन षड्भी—रथैरतिक्रम्य पयोधिमेनम् ॥
तस्यां नगर्यां निजकार्यसिद्धिं । कृत्वा सबन्धुरथ शीघ्रमागाः ॥ ४६ ॥

विसर्ज्य देवं मुदितः प्रभाते । सपांडवः पारणकं विधाय ॥
द्वीपं द्वितीयं प्रति षड्रथैर्द्राग् । हरिश्चचालाचलसत्त्वशाली ॥ ४७ ॥

चलन् पयोधौ स्थूलभूवदेष । तस्यामरस्यातिशयेन सद्यः ॥
गोपीपतिः प्राप च नारदोक्त—पुर्या वने पांडुसुतैः समेतः ॥ ४८ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

तत्रोपवेश्याधिकहृष्टचित्तान् । श्रीपांडवानेवमथाह जिष्णुः ॥
वनेऽत्र भो तिष्ठत याज्ञसेनीं । समानये तूर्णमरिं विजित्य ॥ ४९ ॥
श्रुत्वा हरेर्वाक्यमथातिहृष्टा—स्ते पांडवाः प्राहुरिदं च बन्धो ॥
कार्याणि सर्वाण्यतिदुष्कराणि । सेत्स्यन्ति नूनं भवता सता नः ॥ ५० ॥
परं महद्भिर्निजशक्तिरुच्चैः । प्रयोजनीया निजकार्यसिद्ध्यै ॥
तस्यां गतायां निजकार्यसिद्धि—कृतेऽथ विज्ञप्यमिदं निजेभ्यः ॥ ५१ ॥
कृत्येऽत्र नस्तूर्णमथादिश त्वं । युष्मत्प्रसादाद् द्रुतमेव भावि ॥
पश्चाद्भवानेन समग्रकार्य—सिद्धौ समर्थः सुतरां समस्ति ॥ ५२ ॥
ततस्तदादेशमवाप्य पांडु—पुत्रा रथस्थाः प्रति तं प्रचेलुः ॥
तदागतिं दूतमुखाद्विमत्य । पद्मोत्तरो द्राग्बहिराययौ च ॥ ५३ ॥
आगच्छतस्तान् समराय दृष्ट्वा । तेनातिरुष्टेन नरेश्वरेण ॥
सन्दर्शितुं स्वीयबलं च किञ्चि—न्मृगेन्द्रनादो भयकृत्कृतश्च ॥ ५४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेजोऽस्तहंस्तेऽस्य च काकनाशं । नष्टा यथा पांडुनरेन्द्रपुत्राः ॥
नो रक्ष रक्षेति भृशं ब्रुवन्तो । जनार्दनं शिश्रियुराशु भीताः ॥ ५५ ॥
चित्ते भयं मा कुरुतेदृशं भो । कोऽयं मदग्रे किल कीटकाभः ॥
उक्त्वेति सद्यो हरिभीष्ममूर्ति—र्हरिस्तु तत्सन्मुखमाययौ द्राग् ॥ ५६ ॥
रे रे दुराचार पराङ्गनाङ्ग—संगाभिलाषिन् क्व च यासि पापिन् ॥
नूनं कथाशेषमहं करिष्ये । त्वां साम्प्रतं सर्वसुतादियुक्तम् ॥ ५७ ॥
प्रोच्येति हक्कां किल तां मुमोच । हरिर्हरेर्नादनिभां हि पूर्वम् ॥
यया तदीयं प्रबलं च सैन्यं । ननाश सर्वं करिणां घटावत् ॥ ५८ ॥
कल्पांतकालस्य कृशानुकल्पं । दृष्ट्वा तमायान्तमभि प्ररुष्टम् ॥
पद्मोत्तरो भूरिभयादनश्यत् । कस्तादृशानां पुरतोऽथ तिष्ठेत ॥ ५९ ॥
प्रकारमध्ये त्वरितं प्रविश्य । स दापयामास पुरीप्रतोलीः ॥
शौरिस्तदा भीषणनारसिंह—रूपं विधायागमदस्य पृष्ठौ ॥ ६० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दत्ताः प्रतोलीः सकला विलोक्य । स्वक्रोधवह्नौ हि तमाहुतिं प्राग् ॥
स कर्तुकामः स्वपदप्रहारात् । प्रपात्य ता वै सकला मुकुन्दः ॥ ६१ ॥
प्रविश्य पुर्यां नगरीजनानां । भीतिं प्रभूतां जनयन्निकामम् ॥
रूपेण तेनाधिकभीषणेन । नरेश्वरद्वारि जगाम सद्यः ॥ ६२ ॥ युग्मम् ॥
सुभीषणाकारधरं नरं त—मायान्तमालोक्य भयाकुलात्मा ॥
अप्राप्य चान्यं स तदा शरण्यं । कृष्णां हि भूपः शरणीचकार ॥ ६३ ॥
कृष्णासमीपस्थमिमं विलोक्य । हरिर्जगादेति महापराधिन् ॥
पद्मोत्तर प्रौढमिदं कुकर्म । कृत्वा त्वयैषा शरणीकृतारे ॥ ६४ ॥
महासतीयं शरणीकृता चेत् । त्वया स्यात्सर्वनृपाधमारे ॥
महापराधेऽपि मयाधुना त्वं । मुक्तोऽसि तन्मास्म भयं विधेहि ॥ ६५ ॥
ततः समादाय स कैटभारि—स्तां द्रौपदीं पांडुनृपात्मजेभ्यः ॥
समर्पयामास ततोऽतिहृष्टा—स्ते तं नमन्तिस्म सुविस्मिताश्च ॥ ६६ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सम्पूरयित्वा निजपाञ्चजन्यं । शंखं हरिः पांडुसुतैरुपेतः ॥
स्वकार्यसिद्ध्या घनतुष्टचित्त—स्ततोऽथ पश्चाद्वलते च यावत् ॥ ६७ ॥
तत्कम्बुनादं च निशम्य तस्य । द्वीपस्य तीर्थेशसभानिविष्टः ॥
सम्भ्रान्तचित्तः सुतरां च विष्णु—रुवाच तीर्थेशममन्दभक्तिः ॥ ६८ ॥
केनेदृशः श्रीजिन पाञ्चजन्य—नादः कृतः सर्वबलापहारी ॥
जिनेन कृष्णागमनादिवृत्तं । सर्वं तदग्रे कथितं तदैव ॥ ६९ ॥
विष्णुः पुनः प्राह :जिनेश तत्र । प्राप्तस्य मे तन्मिलनं च भावि ॥
किं तीर्थकृच्चाह तदीयकम्बु—नादेन ते तन्मिलनं न साक्षात् ॥ ७० ॥
ततः समुत्थाय हरिस्तु तूर्णं । सम्प्रस्थितोऽसौ मिलनाय तस्य ॥
पयोधिकण्ठं च जगाम यावत् । कृष्णस्तु दूरं जलधौ जगाम ॥ ७१ ॥
महाध्वजं स्यन्दनसत्कमस्य । स धातकीखण्डहरिर्विलोक्य ॥
हृष्टः स्वचित्ते स्वकपांचजन्य—शंखस्य नादं सुतरां चकार ॥ ७२ ॥

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

स्वस्याच्युतोऽसौ मिलनाय तत्रा—गतस्य तद्द्वीपजनार्दनस्य ॥
आकर्ण्य तत्कम्बुनिनादमुच्चै—श्चक्रे स्वकम्बुप्रतिनादमाशु ॥ ७३ ॥
दिव्यानुभावेन हरिः समुद्र—मुल्लंघ्य तूर्णं सरसीमिवाल्पाम् ॥
भागरथीशैवलिनीमवाप्य । श्रीपांडवानेवमुवाच सद्यः ॥ ७४ ॥
हे बांधवा आत्मभिरागतं यद् । दुर्लङ्घ्य मुल्लंघ्य पयोधिमेनम् ॥
जानीत नूनं त्रिदशानुभावं । सत्कारणं तत्र पवित्रमेतत् ॥ ७५ ॥
अतः परं शैवलिनीमिमां रथैः । सुदुस्तरामात्मभिरेव पार्यते ॥
तरीतुमुच्चैस्तत एव सत्तरी । काचित्समानीयत एव सुन्दरा ॥ ७६ ॥
कुतोऽपि तैश्चारुतरां च तत्रा—नीतां सुनावं प्रविलोक्य सद्यः ॥
जगौ हरिः पूर्वमहो भवद्भि—स्तद्गम्यतां चारुतरीप्रयोगात् ॥ ७७ ॥
उत्तीर्य नद्यां त्रिदशापगां च । पश्चाद्भवद्भिर्मम हेतवे द्राग् ॥
सम्प्रेषणीया खलु नौरियं हि । यथा तयाहं द्रुतमेमि तत्र ॥ ७८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तथेति कृत्वा किल पांडुपुत्राः । पवित्रभार्यासहिताः प्रचेलुः ॥
अल्पेन कालेन सुरापगायाः । पारं च जग्मुर्मुदिताशयास्ते ॥ ७९ ॥
परस्परं तेऽपि विचारयन्ति । तत्रागताश्चेति विलोकयतेऽथ ॥
हरेर्बलं येन महाभुजाभ्या—मुत्तीर्य गङ्गां स्वयमेष्यतीह ॥ ८० ॥
न प्रेषिता तेन तरीयमेतै—रनागतायां समयेऽथ तस्याम् ॥
विचिन्तयेद्देष किमागतेयं । न पांडवानामशिवं किमासम् ॥८१ ॥
एवं भृशं व्याकुलमानसोऽयं । तरन् भुजाभ्यां स्वबलेन गङ्गाम् ॥
मध्यागतो यावदतीवखिन्नो । द्वीपस्तु स्युर्यैह विकुर्वितोऽभूत् ॥ ८२ ॥
विश्राममादाय हरिः प्रकामं । पुनस्तरीत्वा तटिनीं च शेषाम् ॥
तीरं समागात्किल यावदेषो—ऽपश्यच्च पांडोस्तनयान् शिवाढयान् ॥ ८३ ॥
हृष्टस्ततः पृच्छति बान्धवा हे । न प्रेषिता नौः किमियं भवद्भिः ॥
तेऽप्याहुरुच्चैर्भवतः परीक्षा—कृते हि बन्धो प्रहिता न चेयम् ॥ ८४ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

रुष्टस्तदाकर्ण्य जगौ मुकुन्द—स्तूर्णं च रे पांडुसुता नियुक्ते ॥
पश्चोत्तरस्यातिभिया प्रणष्टैः । किं मे परीक्षा न कृता भवद्भिः ॥८५॥
भंक्त्वा रथात् भूरितरप्रकोपा—द्गन्तव्यमाज्ञाबहिरेव मेऽतः ॥
युष्माकमास्यानि विलोकयामि । नोक्त्वेत्यगादात्मपुरे मुकुन्दः ॥८६॥
अथोऽतिखिन्नाः किल पांडुपुत्राः । परस्परं चेति विचारयन्ति ॥
धिगात्मभिर्द्रागविमृष्टमेतत् । कार्यं सदायत्यहितं व्यधायि ॥८७॥
तेनातिरुष्टेन ततो निजाज्ञा—बहिष्कृतैरात्मभिरेव सद्यः ॥
गमिष्यते कुत्र यतो यदाज्ञा । वर्तेत विश्वे भरतार्धमध्ये ॥८८॥
ततोऽखिलानामपि यादवानां । सुमाननीया जननी हि कुन्ती ॥
सम्प्रेष्यते पर्यवसापनाय । हरेर्यतः पूज्यवचो हि मान्यम् ॥८९॥
आकार्य तैस्तत्र ततः स्वमाता । कुन्ती निवेद्य द्रुतमात्मकार्यम् ॥
सम्प्रेषिता स्तोकदिनैरवाप । श्रीयादवाधीशसमीपमेषा ॥९०॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विधाय तस्याः प्रतिपत्तिमुच्चै—र्नीत्यासनारोपणदिव्यभावैः ॥
पृच्छत्युपेन्द्रस्त्विह तूर्णमागाः । पितृस्वसः श्रीभवती किमर्थम् ॥ ९१ ॥

हा वत्स गोविन्द कदाप्यदृष्टथा—हितस्य ते बांधवपांडवेषु ॥
बभूव भूवासिजनैरसह्यः । कोपं कथं ह्येष जगाविदं सा ॥ ९२ ॥

प्रोचे मुकुन्दः पुनरेव मात—स्त्वदङ्गजानां मयकाऽहितानि ॥
द्विषामनेकानि पराकृतानि । वर्याचिन्त्यमीभिर्मम तद्विरूपम् ॥ ९३ ॥

ततो मदाज्ञावरिवर्ति यत्र । पितृस्वसस्तत्र कदापि देशे ॥
स्थेयं न चामीभिरनीतिदुष्ट—वल्लेः फलं नूनमवेह्यदस्त्वम् ॥ ९४ ॥

कुन्त्याह हास्यं सह बांधवेन । त्वयेदमेभिः कृतमात्ममौढ्यात् ॥
सर्वं सहत्वात्सहनीयमेत—द्यतद्धि वृद्धः सह ते लघूनाम् ॥ ९५ ॥

हरे त्वदाज्ञा भरतार्धमध्ये । सर्वत्र नूनं वरिवर्ति पूर्णा ॥
क यान्त्यमी तद्भवता ह्यमीषा—मदायि नूनं मतिकृन्निदेशः ॥ ९६ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पांडव- ॥८५॥

तेषां मृतौ मे मृतिरेव पश्चा—त्तापस्ततस्ते सुतरां च भावी ॥
ध्यात्वेत्यमुं मुश्च ततो निदेशं । यतो विमृष्टं कुरुते महान् वा ॥ ९७ ॥
श्रुत्वेति तस्या हितकृद्वचस्त—न्मुमोच कोपं हरिरेतदुध्धर्वम् ॥
यतो महांतः सततं गुरूणां । वचःकरा एव भवन्ति लोके ॥ ९८ ॥
मातर्यदुक्तं वचनं मया त—न्न चान्यथा स्यात्किल तेन सद्यः ॥
तत्रैव तिष्ठन्तु सुतास्त्वदीयाः । कृत्वा गरिष्ठां नगरव्यवस्थाम् ॥ ९९ ॥
श्रीपार्थपौत्रस्तु परीक्षिकाख्यः । करोतु राज्यं स्वपितुः पदेन ॥
नोल्लङ्घनीया च कदापि नूनं । मातर्मदाज्ञा भवदङ्गजैस्तैः ॥ १०० ॥
कदाग्रहं तं कमलाप्रियस्य । मत्वाथ कुन्ती सुतपार्श्वमेत्य ॥
अचीकथत्सर्वमथाच्युतोक्तं । निशम्य तत्ते सुतरां च हृष्टाः ॥ १ ॥

श्रीगोविन्दबलेन पांडुतनयाः पश्चापि सद्दालकी—खण्डस्थामरकंकिकापुरि विजित्याथो हि पद्मोत्तरम् ॥
लात्वा स्वां दयितां हृतां यदुपतेरादेशतः पूःस्थितिं । कृत्वा गांगतटे सुखेन सततं तिष्ठन्त्यदुष्टाशयाः॥

चरित्रं ॥८५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इति तपोगच्छाधिराजश्रीसोमसुन्दरसूरिसन्ताने सकलवाचनाचार्यचक्रमण्डलीशिरोमणि-
पण्डितश्रीसाधुविजयगणिशिष्यपरमाणुपण्डितश्रीशुभवर्धनगणिविरचिते-
श्रीपांडवचरित्रे महाकाव्ये द्रौपद्यपहारकधातकीखण्डस्थामरक-
ङ्कापूःपतिपद्मोत्तरजयद्रौपदीवालनादिवर्णनोनाम
अष्टमः सर्गः समाप्तः॥ श्रीरस्तु ॥

## ॥ अथ नवमः सर्गः प्रारभ्यते ॥

तत्रैव पांडुतनयाः सनयाः समीप--संस्थाननेकनृपतीन् समरे विजित्य ॥
स्वराज्यसन्निभमहर्निशमेव राज्यं । कुर्वन्ति ते सुकृतिनां सुखमेव येन ॥ १ ॥

तत्रान्यदा सदसि पञ्चसु तेषु सद्यः । संस्थेषु हृष्टहृदयेषु जराकुमारः ॥
आगत्य कौस्तुभमणिं पुरतो मुमोच । पृच्छन्ति तं सपदि वीक्ष्य मणिं सशङ्काः ॥ २ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भ्रातः कुतो यदुपतेर्हृदयस्थलस्या—लङ्कारकारि विविधान्यनृपैरलभ्यम् ॥
रत्नं ह्यदस्तव समीपमगाद्दुरन्त—दुःखप्रदं किमु बभूव हरेश्च मृत्यु ॥ ३ ॥
श्रुत्वेत्यथो वदति सोऽपि सुरप्रयुक्त—श्रीद्वारिकावरपुरीघनदाहयोगात् ॥
भ्रष्टश्रियो यदुपतेर्बलदेवयुक्त—स्यागच्छतस्त्विह भवन्मिलनाय सद्यः ॥ ४ ॥
तस्यान्तरा वननिकुञ्जतरोरधस्तात् । सुप्तस्य शीतसलिलानयनाय रामे ॥
याते मया वनचरेण शरेण पादे । विद्धस्य मृत्युरभवद्धरिणभ्रमेण ॥ ५ ॥ युग्मम् ॥
मत्वा हरिं स्वशरविद्धमहं विषादा—पन्नः करोमि घनशोकभरं च यावत् ॥
स प्राह मा कुरु शुचं शरविद्धपाद—दृष्टेर्यतो निजवचो न वृथा भवेद्धि ॥ ६ ॥
नूनं मृतिर्मम भविष्यति वेदनाति—व्याध्यानया जिनवरेन्द्रनिवेदिता च ॥
तद्याहि सत्वरमितो बलदेवबन्धु—रत्रागतस्तव हतिं हि करिष्यति द्राग् ॥ ७ ॥
प्रोक्तं मयाथ घनतापमिदं विहाय । बन्धो क यामि मम भावि पदं क नूनम् ॥
प्राहाच्युतः सपदि कौस्तुभरत्नमेत—ल्लात्वा व्रज त्वमथ पांडवपार्श्वमाशु ॥ ८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेषां स्वरूपमखिलं भवता ममेदं । मिथ्यापराधकृतिपूर्वमथो निवेद्यम् ॥
ते ह्युत्तमोत्तमतया तव चिन्तितार्थं । दास्यन्ति तद्व्रज तदीयसमीपमाशु ॥ ९ ॥
तज्जीविताावधि नृपा धनदुःखितोऽहं । तत्र स्थितस्तदनु तन्मरणे हताशः ॥
तूर्णं प्रलम्बरिपुभूरिभयेन नष्ट्वा । युष्मत्समीपमहमत्र ततः समागाम् ॥ १० ॥
श्रुत्वा हरेर्मृतिममन्दतडिन्निपात—कल्पामनल्पतरशोकभराकुला हि ॥
मूर्छां गतास्तदनुचन्दनशीतवात—योगेन सत्वरमथाससुचेतनास्ते ॥ ११ ॥
खेदं विधाय सुचिरं घनजातचित्त—वैराग्यतस्तु कथयन्ति परस्परं च ॥
धिग्धिग्भवस्थितिरियं विरसावसाना । यत्रेदृशामपि भवेदशुभा व्यवस्था ॥ १२ ॥
नूनं तदात्मभिरतः परिहार्य एषः । कामं भवः सकलदुःखभरैकहेतुः ॥
अस्मिन् भवे भवपयोधितरीसमानाः । श्रीनेमिनाथचरणाः शरणं भवन्तु ॥ १३ ॥
श्रीनेमितीर्थकृदितः किल पांडवानां । विज्ञाय जैनचरणावसरं शरण्यः ॥
प्रैषीत्प्रबोधकृतये कृतिनाममीषां । पञ्चक्षमाधरशतैः सह धर्मघोषम् ॥ १४ ॥

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

मत्वागतं मुनिवरं तमथ प्रहृष्टा—स्ते पांडवाः स्वपरिवारयुताः प्रणन्तुम् ॥
गत्वा च ते प्रबलमोहविनाशकर्त्रीं । तद्देशनां सपदि शुश्रुवुरादरेण ॥ १५ ॥
नत्वाथ ते मुनिवरं स्वभवान् विबुद्धाः । पप्रच्छुरादरभरेण मुनीश्वरोऽसौ ॥
ज्ञानाब्धिमत्य मधुरेण वचोभरेण । प्रोचे ततः सपदि पूर्वभवांस्तदीयान् ॥ १६ ॥
पुर्याः समीपधरणीभृति बान्धवाः प्राग् । पञ्चेतरेतरमतीवविमोहभाजः ॥
जाता रतिः सुरतिशांतनुदेवनामा— नस्तूल्लसन्मतिसुभद्रक संयुताश्च ॥ १७ ॥
दारिद्र्यकर्दमभरे सुतरां निमग्ना—स्तेऽप्यन्यदा किल यशोधरसूरिवक्त्रात् ॥
धर्मं निशम्य मुदिताश्च भवे विरक्ताः । सन्तो ललुश्चरणमार्हतमादरेण ॥ १८ ॥
ते निःस्पृहा निजवपुष्यपि सत्तपोऽर्के—तीव्रातपेन गुरुभीष्मनिदाघजेन ॥
दुष्कर्ममर्मघनपल्वलमुल्बणं स्वं । शोषं विनिन्युरचिरेण भृशं प्रशांताः ॥ १९ ॥
आद्यस्तपस्तु कनकावलिनाम चक्रे मुक्तावलिं तदपरश्च ततस्तृतीयः ॥
मुक्तावलिं तदनु सिंहनिकेतनाख्यं । तीव्रं तपः किल चकार चतुर्थसाधुः ॥ २० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आचाम्लपूर्वकमथो किल वर्धमाना—ख्यं सत्तपोऽपि तपतिस्म सुभद्रकोऽपि ॥
पञ्चाक्षनिग्रहवशेन महाव्रतानि । पञ्चापि पञ्च किल ते परिपालयन्ति ॥ २१ ॥
स्वकर्मदाहाय सुधातुदेहं । तपोऽग्निना तेऽपि च शोषयित्वा ॥
प्रान्ते विधायानशनं च मृत्वा । तेऽनुत्तरे नाकिवरा बभूवुः ॥ २२ ॥
च्युत्वा ततः पांडुसुता भवन्त—स्ते नाकिनोऽतीवबला बभूवुः ॥
अस्मिन् भवे वो भविता शिवश्री—लाभो महान् नैश्वयतो नरेन्द्राः ॥ २३ ॥
श्रुत्वेति वैराग्यरसप्रपूर्णाः । शिवं समासन्नमथेच्छवस्ते ॥
न्यस्येह राज्ये च जराकुमारं । गुरोः समीपे जगृहुस्तपस्याम् ॥ २४ ॥
दीक्षां पुनः प्रापतुराशु कुन्ती—कृष्णे अपि छिन्नतरान्तराये ॥
नानाप्रकाराणि तपांसि चक्रुस्ते पञ्च चाभिग्रहभूषितास्ते ॥ २५ ॥
पञ्चापि शुद्धाः समितीस्त्रिगुप्ती—र्ब्रह्मव्रतं चातिविशुद्धमेते ॥
धरन्ति शिक्षां द्विविधां गुरूक्तां । चरन्ति चारित्रमतीव शुद्धम् ॥ २६ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

तथा विहारं नवकल्परूपं । कुर्वन्ति दुष्कर्मविपक्षभीताः ॥
सुदुर्दमान् पञ्च निजेन्द्रियांश्च । नियन्त्र्य संवेगसुरज्जुभिस्ते ॥ २७ ॥
घोरोपसर्गान् सुपरीषहांश्च । तथा सहन्तः सुतरामथामी ॥
चतुर्विधैरप्यमरैरतीवा—क्षोभ्या बभूवुश्चरणे मुनीशाः ॥ २८ ॥
श्रीनेमितीर्थेशमथोज्जयन्ते । सम्प्राप्तमाकर्ण्य च नन्तुकामाः ॥
भक्त्योल्लसन्तः पुलकं दधाना—श्चेलुर्नगं तम्प्रति पांडुपुत्राः ॥ २९ ॥
क्रमाद्धरायां विहरन्त एते । श्रीपांडुपुत्राः पुरि हस्तिकल्पे ॥
प्राप्ता जनेभ्यः खलु शुश्रुवुः श्री—नेमिप्रभोर्मोक्षगतिं गरिष्ठाम् ॥ ३० ॥
विखिन्नचित्तास्तु विचिन्तयन्ति । तेऽप्येवमस्माकमथो धिगस्तु ॥
जगन्नमस्यस्य जिनस्य जज्ञे । येषां नतिर्नो न घनप्रमादात् ॥ ३१ ॥
देहेन पश्चादपि नश्वरेण । तेनास्ति कार्यं किमतः परं नः ॥
चतुर्विधाहारमथो विहाय । कुर्मः कुकर्मक्षयमेव सद्यः ॥ ३२ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कृत्वोज्जयन्तं किल दक्षिणे च । सम्प्राप्य शत्रुञ्जयतीर्थमेते ॥
क्षिप्त्वाथ कर्माण्यखिलानि जग्मुः । कुन्तीयुताः सिद्धिमनन्तसौख्याम् ॥ ३३ ॥
चारित्रमाराध्य ततो विशुद्धं । सा द्रौपदी पञ्चमकल्पसौख्यम् ॥
भुक्त्वा चिरं चेह भवे नराणां । महोदयं प्राप्स्यति निश्चयेन ॥ ३४ ॥

पञ्चामी हि जराकुमारसुखतः श्रुत्वा मृतिं श्रीहरे-र्जातस्फारविरागपूर्णहृदयाः स्वप्राग्भवान् पांडवाः ॥
पृष्ट्वा मातृयुताः विमुक्तविभवाः शत्रुञ्जयाख्ये गिरौ । सिद्धाः श्रीचरणेन पञ्चमदिवं प्राप्ताथ कृष्णा सती॥३५

इति तपोगच्छाधिराजश्रीसोमसुन्दरसूरिसन्ताने वाचनाचार्यचक्रमण्डलीशिरोमणिपण्डित श्रीसाधुविजयगणिशिष्यपरमाणुपण्डितश्रीशुभवर्धनगणिविरचिते श्रीपांडवचरित्रे महाकाव्ये पांडवमोक्षगमननामा नवमः सर्गः समाप्तः ॥श्रीरस्तु॥

॥ तत्समाप्तौ च समाप्तमिदं श्रीपांडवचरित्रं महाकाव्यम् ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

## ॥ अथ शुद्धिपत्रम् ॥

| पत्र. | पृष्ट. | लींटी | अशुद्ध. | शुद्ध. |
|---|---|---|---|---|
| ” | २ | १० | त्वं | स्वं |
| ५ | २ | ५ | व्यमना | व्यसना |
| ५ | २ | ७ | घमं | धर्मं |
| ६ | २ | १ | दुखात् | दुःखात् |
| ८ | २ | २ | गरिष्टः | गरिष्ठः |
| ९ | १ | ४ | मूमीशितुः | भूमीशितुः |
| ९ | २ | ६ | बभूव | बभूवुः |
| १० | २ | १० | तरण | मरण |
| १३ | २ | १२ | पंकजौद्य | पंकजौघ |
| १४ | १ | ७ | युधिष्टिरः | युधिष्ठिरः |
| १५ | १ | २ | नहनिशं | महनिशं |
| १५ | २ | ६ | भ्रमन्ती | भ्रमन्ति |
| १६ | १ | ९ | भक्रीडतः | भक्रीडतः |
| १६ | २ | १२ | विश्वादुतकारि | विश्वाद्भु- |
| १७ | १ | ७ | कलाभूत | कलाभृत |
| १८ | २ | ९ | ननं | नैनं |
| १९ | १ | १ | सहृदैः | सुहृदैः |
| १९ | १ | ४ | गरिष्टा | गरिष्ठा |
| १९ | २ | ६ | णणि | गणिभिर्विरचिते |
| २० | १ | १ | दुपदस्य | द्रुपदस्य |
| २० | १ | ५ | चरेराययुः | चरैराययुः |
| २० | २ | ५ | सुतोत्तमैस्तः | सुतोत्तमैस्तैः |
| २१ | १ | ५ | समुद्धः | समुद्रवः |
| २१ | १ | ७ | धनुःघृतौ | धनुर्घृतौ |
| २१ | २ | ३ | भो मो | भो भो |
| २१ | २ | ६ | पतिवर्ग- | पतिगर्व |
| २२ | १ | १ | सुरन्दुदुभि | सुरदुन्दुभि |
| २२ | २ | ११ | गोपालिकाथा | गोपालिकाया |
| २३ | १ | २ | तनुते | ततते |
| २३ | २ | ५ | कृष्णः | कृष्ण |
| २३ | २ | ५ | मात्ण | मात्म |
| २३ | २ | १० | करोध्व्यस्थां | करोद्व्यवस्थ |
| २४ | १ | २ | सत्यसंघो | सत्यसंधो |
| २४ | १ | ८ | निष्कासितत: | निष्कासितः |
| २४ | २ | २ | रैवत | रैवत |

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

| | | | | |
|---|---|---|---|---|
| २७ | २ | १ | समा | समापुर्यं |
| २९ | १ | ८ | अमीणयत् | अप्रीणयत् |
| २९ | १ | ११ | पटिष्टा | पटिष्ठा |
| ३० | १ | १ | अजुन | अर्जुन |
| ३० | १ | ९ | विदुरंण | विदुरेण |
| ३० | २ | ८ | संघः | संधः |
| ३१ | १ | ३ | सदा | सदो |
| ३२ | १ | १ | चत् | चेत् |
| ३२ | २ | ४ | दुपदात्मजा | द्रुपदात्मजा |
| ३२ | २ | १२ | अल | अलं |
| ३७ | १ | ५ | विडम्बां | हिडम्बां |
| ३८ | २ | १ | पृष्ठो· | पृष्टो |
| ३८ | २ | ७ | नून | नूनम् |
| ३९ | १ | २ | सुपुष्ठ | सुपुष्ट |
| ४२ | १ | ११ | स्वे | खे |
| ४४ | १ | ४ | सोऽतीह | सोऽस्तीह |
| ४५ | १ | ३ | पणम्य | प्रणम्य |
| ४८ | १ | ९ | सुतापर्तित्वात् | सुतापति० |
| ४९ | २ | ६ | पांडवा | पाण्डवान् |
| ५३ | १ | १ | चतसि | चेतसि |
| ५३ | १ | २ | कुयत | कृत्य |
| ५४ | १ | १ | पल्लव | वल्लव |
| ५४ | २ | ३ | पडुत्तर | षडुत्तर |
| ” | २ | ६ | तदूप | तद्रूप |
| ” | २ | ८ | गजाम | जगाम |
| ” | २ | ११ | नुचेतन | तनुचेतन |
| ५६ | २ | ३ | कैश्चकां | कैचकां |
| ५७ | २ | ५ | गोकुल | गोकुलं |
| ५८ | २ | ८ | निराट | विराट |
| ६० | २ | ८ | प्रसृत | प्रसृतं |
| ६१ | १ | ६ | पृष्ट | पृष्ठ |
| ६१ | २ | ४ | वीर्य | वीर्यः |
| ६१ | २ | ७ | पवनात्मेजाधा | पवनात्मजाधाः |
| ६४ | १ | ७ | सकललोभ | सकललोके |
| ६५ | १ | ५ | नरेन्द्रः | नरेन्द्रैः |
| ७६ | १ | ६ | जहष | जहर्ष |
| ७७ | २ | ७ | नरेःद्रा | नरेन्द्रा |
| ८४ | १ | ५ | तरीयमतै | तरीयमेतै |
| ८५ | २ | ११ | ककिका | कर्किका |

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

॥ समाप्तमिदं श्रीपांडवचरित्रं महाकाव्यम् ॥

पंन्यासजी महाराजश्री
कनक मुनिजी गणी.

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust